३४(२)

THE

PRINCESS OF WALES

SARASWATI BHAVANA TEXTS

No. 16.

THE

# KĀVYA VILĀSA.

GOVERNMENT SANSKRIT LIBRARY,

BENARES.

1925.

Saleable at half of the printed price.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

THE

PRINCESS OF WALES

# SARASWATI BHAVANA TEXTS.

EDITED BY

GOPĪ NĀTHA KAVIRĀJA.

NO. 16.

THE

# KĀVYA VILĀSA.

BENARES.

1925

Saleable at half of the printed price.

Price, Rs. 1-2-0.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

चिरञ्जीवविरचितः

# काव्यविलासः

THE

# KĀVYAVILĀSA

OF

CHIRAÑJĪVA BHAṬṬĀCHĀRYA

EDITED WITH INTRODUCTION ETC.

77905

by

BAṬUKA NĀTHA ŚARMĀ SĀHITYOPĀDHYĀYA, M. A.,
*Professor of Sanskrit, Benares Hindu University,*
*Benares.*

*and*

*Jagannātha Śāstrī Hoshiṅg, Sāhityopādhyāya,*
*Sādholāl Scholar, Government Sanskrit College, Benares.*

---

Printed by Rameshwara Pathak, at the Tara Printing Works,
Benares.

---

*Published under the authority of the Government of the United Provinces by the Superintendent of Government Press, Allahabad.*

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

# INTRODUCTION.

## I THE PRESENT WORK.

No apology is perhaps called for, for a work which has any kind of importance going with it. An important work, widely known to exist but not easily accessible, naturally creates a want to supply which is a necessity and not a superfluity. The small work, presented herewith, is going to see the light for the first time in print. It is a comparatively recent work, not even 250 years old ; but it is curious to note that it has been enjoying a wide circulation among the Pandits of India. If we care to look into catalogues of Sanskrit manuscripts[1], we shall find that a very large number of काव्यविलास MSS. have been noticed here and there. All provinces of India, having any literary importance about them, have been represented in the MS. Catalogues with regard to possessing the MSS. of काव्यविलास ।

A brief critical survey of its contents.

Wide circulation of a work undoubtedly indicates the intrinsic merits which are possessed by it. In the case of the present work, this supposition is much more clearly borne out by its useful contents. As customary

1. Notices of Sanskrit MSS. by Rājendra Lal Mitra. Cal. 1871-72 ; Catalogues of Sanskrit MSS. existing in Oudh by Pandit Devi Prasad, Allahabad, 1881-93 ; Catalogue of Sanskrit MSS in the Raghunath Temple Library of H. H. The Maharaja of Kashmir by M. A. Stein, Bombay, 1894 ; Catalogue of Sanskrit MSS. in the Library of H. H. The Maharaja of Alwar by P. Peterson, Bombay 1892 ; etc., etc. For references to other catalogues describing or mentioning the MSS. of काव्यविलास see Aufrecht's Catalogus Catalogorum, Vol. I. p. 102, Vol. II p. 20 and 193, Vol. III p. 22 ; Dr. De's History of Hindu Poetics Vol. I p. 294 ; Dr. Haricanda Śāstri Kālidāsa et L'art Poétique de l'Inde, p. 25.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

with all Sanskrit works, it begins with a मङ्गलाचरण[1] । The śloka seems to have been a favourite one with the author, for this is the śloka which is given in the beginning of विद्वन्मोदतरङ्गिणी । In the next two ślokas[2], we find our author striking a note of indifference towards those who take glass for a jewel on account of their ignorance. In the śloka[3], coming after these two, we are told that in this work the definitions are taken from old standard writers while the examples are of the author's own composition.

Then our author takes up the question of काव्यस्वरूप [4]. He begins with the well-known definition of मम्मट[5]. He does not criticise it but rather explains it. Such is also his attitude towards the author of शब्दागम and others, the definition[6] of whom is here given and explained. Lastly he gives and explains the definition[7] of काव्य according to the writers latest to his time. In quoting and explaining the three definitions of काव्य referred to above, our author has admirably kept himself aloof, though there is every possibility, he might have been inclined towards the last.

Definition of काव्य

Various definitions of काव्य have been given from time to time. All are at one in believing that poetry has some charm and that charm comes from the peculiar kinds of words and sense

---

1. P. 1.
2. Second and third Ślokas, pp. 1-2.
3. The fourth Śloka, p. 2.
   अलङ्कारध्वनिकाव्यादिषु गुणेषु च ।
   रचयन्ते स्वीयपद्यानि प्राचीनकृतलक्षणैः ॥
4. Pp. 2-3.
5. तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि–काव्यप्रकाश ( प्रथम उल्लास ) ।
6. सरसालङ्कारवती निर्दोषा गुणभूषिता ।
   सरीतिर्लक्षणवती या वाक् सा काव्यनामभाक् ॥
7. कविजनीनानु-विलक्षणचमत्कारकारित्वमेव काव्यलक्षणमामनन्ति, p.4.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

used in it.[1] Now the writers differ from one another in their conception of this peculiarity. All these can be grouped under three different heads. There are some who attach too much importance to external embellishments such as figures, styles etc., whereas there are others who hold that these are not all in all, for they are but means to something still higher and deeper, namely, emotion. Lastly come those to whom charm appears to be the real essence of poetry. That charm may come either from figures etc. or from the awakening of emotions themselves. If we keep such a division in our mind and apply it to the definitions given by our author, we shall find how adroitly he has briefly given expression to all the most important views upon the definition of काव्य ।

रस

After briefly discussing the प्रयोजन and कारण of काव्य after मम्मट and जयदेव respectively, he takes up the question of रस । Beginning with स्थायिभावs, the author takes up all the रसs, one by one, mentioning their विभावs etc. and exemplifying them with verses of his own composition. Like most आलङ्कारिकs, he recognises nine रसs including शान्त as the ninth. He refers to the view of भानुदत्त who in his रस तरङ्गिणी tried to have माया as the tenth रस । This view being severely criticised by our author totally falls to the ground. It is interesting to note that he does not hold वात्सल्य, भक्ति etc. as रसs. विश्वनाथ in his साहित्यदर्पण has already given a place to वात्सल्य. The वैष्णवs of Bengal were very fond of having what is known as मधुररस. But we do not find any reference to all these in our present work.

It is not quite clear what place he would assign to रस in the scheme of his काव्य । He seems to be silent on this point. But we may take it that he would never allow रस to be made sub-

1 cf. इह विशिष्टौ शब्दार्थौ काव्यम् etc. समुद्रबन्ध's commentary on रुय्यक's अलंकारसूत्र p. 4 (Trivandrum Edn).

CC-0. Sampurnanand University Collection. Digitized by eGangotri

servient to अलङ्कारs or रीतिs as दण्डी and वामन would have done. Neither would he subscribe to the view of विश्वनाथ or केशव who holds रस as the whole and sole essence of poetry. We may have a clue to his real view perhaps by the third definition of काव्य given in the name of अतिनवीनs। चमत्कार is the real essence of काव्य. It may either come from रस etc. or from अलङ्कारs etc. In the former case we call it ध्वनिकाव्य and in the latter, चित्र-काव्य। This was the view of मम्मट as well as that of जगन्नाथ and most probably that of our author as well.

The second chapter begins with the enumeration of अलङ्कारs.

अलङ्कार।

The number is sufficiently large. It is interesting to note how the number of our figures has been increasing as time was passing on and on. In भरत's नाट्यशास्त्र we have only four—उपमा, रूपक, दीपक and यमक। In the works of दण्डी, भामह and उद्भट, there are clear clues to the different views about the number of अलङ्कारs. मम्मट in his काव्यप्रकाश has only sixty-one. The commentators have been trying to show how many figures held by others, could be included under those of मम्मट। अप्पय्यदीक्षित the author of कुवलयानन्द is one of those who have the largest number. Our anthor has struck the middle path by having more than those of मम्मट and less than those of अप्पय्यदीक्षित।

The definitions of अलङ्कारs are mostly taken from चन्द्रालोक। Some of them are taken from काव्यप्रकाश also. The definitions are followed by a brief वृत्ति and illustrative examples, both of which are of our author's own composition. The verses, cited as examples, bear high testimony to the great poetic genius possessed by चिरञ्जीव। Lastly we have the शब्दालङ्कारs. Here we find one thing more. Besides the illustrative ślokas, we have examples along with the defining Kārikas themselves exactly as we have in कुवलयानन्द and चन्द्रालोक।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

Thus after taking a very brief survey of the contents of the work, we find that it is a very useful book for ordinary students of अलङ्कारशास्त्र । There is perhaps scarcely any book where रसs and अलङ्कारs have been treated of in more clear and easy language. It has, moreover, the rare advantage of being written by a person who was himself a poet of no mean merit.

## II THE AUTHOR.

The real name of our author was रामदेव or वामदेव[1] but he has been better known by his pet name of चिरञ्जीव given to him out of affection by his uncle.[2] He came of a very illustrious family of learned Brāhmaṇas. The first member of his family of whom any account can be had, was दक्ष who lived at राढ़ापुर[3] । To दक्ष was born काशीनाथ[4] who, as he could tell the past and future of persons by simply looking at them, became known as सामुद्रकाचार्य (Master of Palmistry).[5] He had three sons—राजेन्द्र, राघवेन्द्र and महेन्द्र or महेश[6]. Of these the second, राघवेन्द्र, turned out to be an extraordinary scholar and poet. The proverb that child is the father of man was much more true in the case of this great man than any other. He mastered all the विद्याs obtaining in his days before he was barely sixteen. He

---

1. [illegible] पित्रा मे [illegible] ।
[illegible] ॥—विद्वन्मोदतरङ्गिणी (Venkateśvara Edn. I. 19)

In most of the MSS, he is named रामदेव । For example, see India Office Catalogue, Vol. III, p. 343.

2. [illegible] ।
[illegible] ॥-विद्वन्मोदतरङ्गिणी 1.2

3. I. विद्वन्मोदतरङ्गिणी I. 2—3.

4. Ibid I. 5

5. सामुद्रके सोऽस्य समुद्रकल्पः सामुद्रकाचार्य इति प्रसिद्धिम् ।
लेभे नृणामाकृतिदर्शनेन फलं वदन् भूतभविष्यदादि ॥ विद्वन्मोदतरङ्गिणी । I. 6.

6. विद्वन्मोदतरङ्गिणी I. 7.; Aufrecht Catalogus Catalogorum, I. 104b I. 500b.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

was a student of भवानन्द सिद्धान्तवागीश[1] from whom he learned all he had to learn. He became a शतावधान and could perform a hundred things simultaneously. To his fertile poetic faculty, there seemed to be no limit. He wrote मन्त्रार्थदीप an रामप्रकाश[2] । राघवेन्द्र died at काशी ta a ripe old age.

This great man was the father of our author, रामदेव or चिरञ्जीवभट्टाचार्य । Being an exceptionally intelligent boy, Chiranjiva was quite favourite with his great father. He seems to have studied न्याय and many other शास्त्रs with his father for whom he had a very high reverence. He seems to have been a pupil of रघुदेव न्यायालङ्कार also[3] with whom he studied perhaps काव्य and अलङ्कार ।

He looked upon his father as शिव incarnate.[4] At the end of every chapter, here as elsewhere, he gives a śloka in which he praises himself not with the description of his personal attainments; but by mentioning himself as the son of राघवेन्द्र, the great शतावधान[5] ।

---

1. This भवानन्द सिद्धान्तवागीश appears to be no other person than the author of तत्त्वचिन्तामणिदीधितिप्रकाशिका ( भवानन्दी ), कारकार्थनिर्णय-तत्त्वचिन्तामणिटीका, प्रत्यक्षालोकसारमञ्जरी etc. He lived about 1625 A. C.
See सतीशचन्द्र विद्याभूषण's History of Indian Logic, p. 479.

2. For all this information in more detail see विद्वन्मोदतरङ्गिणी I and Aufrecht's Catalogus Catalogorum, vol I, p. 104b, 500b. His feats as a शतावधान are described by चिरञ्जीव in his विद्वन्मोदतरङ्गिणी in the following words.—

एकैकमेकैककविप्रयुक्तं श्लोकादिपादं वर्णमप्यवधारयन् ।
आकर्ण्य तत्संख्यमथ प्रयुङ्क्ते स्वयंकृते श्लोकशतं च वर्णम् ॥
रीत्यानया श्लोकशतं कवीनां शतस्य निर्वेकवधारयित्वा ।
समस्यया पूर्तिमतीमथैनं स्वयंकृतश्लोकशती तथैव ॥ विद्वन्मोदतरङ्गिणी I. 10—11.

3. इमौ भट्टाचार्यश्रीरघुदेवस्य चरणौ
शरण्यौ चिन्तान्तर्मैरपि विधाय स्थितवतः । काव्यविलास p. 12

4. जाने कदाचिदपि नैव पितुः स्वरूपात् तातात् परं दैवतमन्यदत्र-विद्वन्मोदतरङ्गिणी I. 25.

5. द्वैताद्वैतमतादिनिर्णयविधि प्रौढप्रबुद्धिप्रभो
भट्टाचार्य शतावधान इति यो गौडोद्भवोऽभूत् कविः etc.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

We know nothing about his personal life. He gives many ślokas in praise of यशवन्तसिंह[1] who was a Naib Diwan of Śujauddaulah of Bengal. He must have been patronised by this यशवन्तसिंह ।

Though we cannot give an exact date of his birth and death, still we can, with a certain amount of certainty, come to a satisfactory conclusion with regard to the age in which he flourished. His father, राघवेन्द्र, was a contempoary of कृपाराम who was favoured by Emperors Jahangir and Shahjahan and so he must have been living by the middle of the 17th century.[2]

His date.

In exemplifying गुरुविषया रतिः, our author takes the opportunity of paying his homage to रघुदेवभट्टाचार्य[3] । रघुदेवभट्टाचार्य is, with all probability, the same person as रघुदेव न्यायालङ्कार[4], the desciple of हरिराम तर्कवागीश and the author of तत्त्वचिन्तामणिगूढार्थदीपिका, नवीननिर्माण etc. रघुदेव must be older than यशोविजयगणी who quotes him in his अष्टसाहस्रीविवरण । यशोविजयगणी died in 1688 A. C. We may therefore say with good reason that रघुदेव must have been also living by the middle of the 17th century.

Now we come to more definite dates. चिरञ्जीव wrote his वृत्तरत्नावली, a work on metres where all exemplary verses are the panegyrics on यशवन्तसिंह Naib-Diwan of Dacca under Sujāuddaulah of Bengal, about śaka 1653 or 1731 A. C.[5] His काव्यविलास was composed in 1703 A. C.[6] In काव्यविलास

1. श्रीमद्यशवन्तसिंहनृपतेः परताप यानोल्लसे etc. काव्यविलास p. 7. ; यशवन्त ! नवनिशितिनायक तावकद्वानयथैतिमिरैः सहसा .etc. काव्यविलास p. 30.
2. See सतीशचन्द्र विद्याभूषण's History of Indian Logic, p. 479.
3. काव्यविलास p. 12.
4. See सतीशचन्द्र विद्याभूषण's History of Indian Logic, p. 481.
5. हरप्रसाद शास्त्री's Notices of Sanskrit MSS., III no. 280
6. Dr. De's History of Hindu Poetics, Vol. II, p. 284, सतीशचन्द्रविद्याभूषण's History of Indian Logic, p. 483.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

we find verses from many of his works cited as examples and so we may conclude that he must have written them before 1703 A. C.

Thus it is quite clear from the above that his period of literary activity extended for many years beginning in the last quarter of the 17th and coming down to the middle of the 18th century.

*His works.*—Besides काव्यविलास, Aufrecht, in his Catalogus Catalogorum, gives us the following names as those of the works of रामदेवचिरञ्जीवः—

( १ ) माधवचम्पू
( २ ) विद्वन्मोदतरङ्गिणी
( ३ ) शृङ्गारतटिनी
( ४ ) वृत्तरत्नावली ।

In काव्यविलास we find two more names of his works. They are कल्पलता and शिवस्तोत्र ।

माधवचम्पू is a small काव्य of the चम्पू type which has for its characteristic the mixture of prose and poetry. It has been published in Calcutta by जीवानन्द विद्यासागर.

विद्वन्मोदतरङ्गिणी is a very interesting work written on the model of a चम्पूकाव्य । It consists of eight chapters called तरङ्गs. The first chapter gives us a glimpse of the author's family history. The remaining seven chapters have the popular expositions of all the famous दर्शनः in easy fluent poetic language. It reads like a drama. It has been published at many places. The editions of जीवानन्दविद्यासागर and the वेङ्कटेश्वर press are worthy of note.

शृङ्गारतटिनी, as also कल्पलता and शिवस्तोत्र, seem to have been काव्यः, the first two of the erotic type and the last of the religious type.

वृत्तरत्नावली is a work on metrics or छन्दःशास्त्र like छन्दोमञ्जरी but much confined in its scope. The speciality about

CC-0. Sampurnanand University Collection. Digitized by eGangotri

this work is that almost all ślokas given as examples are in praise of यशवन्तसिंह mentioned above.

Our author was a prolific writer and must have written a large number of other works which are perhaps wholly lost. In विद्वन्मोदतरङ्गिणी[1] he tells us that he has written many works on न्याय and other शास्त्रs; but to our great regret, none of them has been any where traced. सतीशचन्द्र विद्याभूषण,[2] though he assigns a niche to चिरञ्जीवभट्टाचार्य among the नैयायिकs, does not give us any clue to his works on न्याय। Perhaps it was this statement of चिरञ्जीव in his विद्वन्मोदतरङ्गिणी which led the author of the History of Indian Logic to give a place to him even though he was not able to find any of his works.

## III THE PRESENT TEXT.

The present text of चिरञ्जीव भट्टाचार्य's काव्यविलास is mainly based on a single manuscript. This manuscript once belonged to Mānakavi, the well-known poet-scholar of Charkhari. He was the great-grand father of the present writer and so in due course it came in his possession. By comparing the writing of this MS. with that of others written by Māna Kavi, it appears that this MS. was copied by himself. This fact perhaps accounts for the great accuracy and all-round correctness which characterise this MS. It is written in bold clear Devanāgari characters upon white country-made paper. In its present state it consists of 37 leaves measuring 9″ × 4½″ in size. Each leaf has 10 lines on each side and each line has 30 letters on the average. The present MS. breaks off with श्लोकार्थस्तु—न नमतीत्यनमा अभिमानिनी, नवभा नवद्दीप्तिः, मारेण कामे[3]—and so it appears that the last three leaves of this MS. have been lost.

It was quite disheartening to discover its incompleteness so much so that all thought of publishing काव्यविलास was put off

---

1. न्यायादिशास्त्रेषु मया कृता ये काव्येषु ये वा रचिताः प्रबन्धाः ।
   भवन्ति विवादाय च वादवादे ये ते सुधान्तःपरितोषकास्ते ॥ I. 22.
2. History of Indian Logic, p. 483.
3. Corresponding to the printed text on page 51.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

for the time being. The learned editor of the series was thinking of getting a copy of the work from the India Office who have an excellent MS. with them[1]. But all of a sudden, one day, the last portion of this work was discoverd in the कुवलयानन्द-कारिका[2], where it has been inadvertently printed by the editor. The mistake of one turned out to be a very great help to the other. The portion which is common to both wholly corresponded with each other. So without hesitation, the last four pages of कुवलयानन्दकारिका were made the basis of the last five pages of our work. It would have been undoubtedly very helpful if the India office MS. could have been available for comparison. But as it was too late, we had to be content with what we ourselves possessed.

Now the only thing which remains to be done is the pleasant duty of expressing heart-felt thanks to all those friends from whom the present writer has been getting help in some way or other. He should give expression to his great grateful appreciation of the valuable help which has been rendered to him by Pandit Jagannāth Śāstri Hoshing, the Sadho Lal scholar of the Government Sanskrit College. He will indeed be failing in his duty if he forgets his highly esteemed friend Pandit Nārāyaṇa Śāstri Khiste of the Saraswati Bhavana, Govt. Sanskrit Library. Last but best of all, his heart goes up with most sincere gratitude to one by whose wonderful personality he has been influenced in ways too many to be expressed by words. That most revered person, here meant, is no other than the learned editor of this series, Principal Gopināth Kavirāj of the Govt. Sanskrit College, Benares.

The Benares Hindu University,
ज्येष्ठ शुक्ल ७,१९८२.।
30th May, 1925

BATUK NATH SHARMA.

1. India office catalogue Vol. III pp 343—344.
2. कुवलयानन्दकारिका, edited by V. L. Panashikar, Nirnaya Sagar Press, Bombay, 1909.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

# काव्यविलासस्य विषयानुक्रमणिका ।

## प्रथमा भङ्गिः १—१२


| विषयाः | पृष्ठम्. |
|---|---|
| १ शिष्टाचारपरम्परानुगतं मङ्गलं, स्वाभिप्रायद्योतकं ग्रन्थकृतस्तद्व्याख्यानं च । .... .... | १ |
| २ स्वकीयग्रन्थसमादरस्य युक्त्याऽऽशंसनम् ।.... | १—२ |
| ३ अनुबन्धचतुष्टयान्तर्गतस्य द्वितीयस्य प्रयोजनरूपस्याऽनुबन्धस्य प्राचीनोक्तलक्षणैः स्वपद्यावलिसङ्घटनरूपेण प्रदर्शनम् । .... .... | २ |
| ४ श्रीमन्मम्मटभट्टप्रतिपादितकाव्यस्वरूपस्य स्पष्टतया प्रतिपादनम् । .... .... .... | २ |
| ५ रसरीतिलक्षणसाहित्येन शरदागमप्रभृतिसंमतस्य काव्यस्वरूपस्य समङ्गत्युपन्यसनम् । .... | २ |
| ६ 'विलक्षणचमत्कारकारित्वमेव काव्यत्व' मिति काव्यस्वरूपं लक्षयतामतिनवीनानां मतोपन्यासस्तत्सङ्घटनं च । .... .... ... | २—३ |
| ७ काव्यप्रकाशकारोक्तकाव्यप्रयोजनलक्षणनिरूपणम् । | ३ |
| ८ प्राचीनोक्तदिशा काव्यकारणं त्रिनिर्दिश्य प्रतिभाया एव काव्यकारणत्वेन स्वीकारः । .... | ३ |
| ९ काव्यस्वरूपसम्पादकत्वेन रसनिरूपणस्यावश्यकत्वात्तत्सङ्ख्यानम् । .... .... | ३ |
| १० प्रसङ्गतो रसानुगुणस्थायिभावानां प्रदर्शनम् । | ३—४ |


CC-0. Sampurnanand University Collection. Digitized by eGangotri

| | विषयाः | पृष्ठम्. |
|---|---|---|
| ११ | विभावाद्यैस्तत्परिपोषेण रसत्वनिदर्शनं प्राचीनोक्त्योपपाद्य विभावादीनां रूपस्थापनम्। .... | ४ |
| १२ | रसानां क्रमशो लक्षणप्रतिपादयिषया समपक्षस्य शृङ्गाररसस्य लक्षणनिरूपणम्। .... | ४ |
| १३ | संभोगविप्रलंभात्मकत्वेन द्विविधस्याऽपि शृङ्गाररसस्य सोदाहरणोपन्यासः। .... .... | ५ |
| १४ | हास्यरसस्य समपक्षयुक्तिः। .... .... | ५—६ |
| १५ | करुणरसस्य ,, ,, । .... .... | ६ |
| १६ | रौद्ररसस्य ,, ,, । .... .... | ६—७ |
| १७ | वीररसस्य ,, ,, । .... .... | ७—८ |
| १८ | भयानकरसस्य ,, ,, । .... .... | ८ |
| १९ | बीभत्सरसस्य ,, ,, । .... .... | ८ |
| २० | अद्भुतरसस्य ,, ,, । .... .... | ८—९ |
| २१ | शान्तरसस्य ,, ,, । .... .... | ९ |
| २२ | रसानां रूपदैवतनिरूपणम्। .... .... | ९ |
| २३ | मायायाः स्थायिभावादिभिर्दशमरसत्वमुदाहरणे संसाध्य युक्त्या तत्खण्डयित्वा च रसानां नवविधत्वस्यैव संस्थापनम्। .... .... | १० |
| २४ | विप्रलंभस्य करुणेऽन्तर्भावः। .... | १०–११ |
| २५ | रत्याख्यस्य भावस्य सभेदोदाहरणप्रपञ्चनम्। | ११–१२ |
| २६ | रसविस्तारस्य ग्रन्थान्ते प्रतिपादनप्रतिज्ञा। | १२ |
| २७ | नामदेशादिकीर्तनं, रसभङ्ग्याः समाप्तिसूचनं च। | १२ |

CC-0. Sampurnanand University Collection. Digitized by eGangotri

## द्वितीया भङ्गिः १३-५६


विषयाः पृष्ठम्

१ शब्दार्थाभ्यां द्विविधस्याऽलङ्कारस्य सामान्यलक्षणनिरूपणम् । १३

२ अलङ्कारपरिगणनम् । .... .... १३-१४

३ परिगणनक्रमेणाऽर्थालङ्काराणामुदाहरणसङ्क्रमनेन लक्षणादिनिरूपणम् । तत्र च—

(१) उपमा .... .... .... १४-१५

(२) अनन्वयः .... .... .... १५

(३) प्रतीपोपमा .... .... १५

(४) ललितोपमा .... .... १५-१६

(५) रूपकम् .... .... .... १६

(६) परिणामः .... .... .... १६

(७) उल्लिखितः .... .... १६-१७

(८) अपन्हुतिः .... .... १७

(९) भ्रान्तापन्हुतिः .... .... १७-१८

(१०) छेकापन्हुतिः .... .... १८

(११) पर्यस्तापन्हुतिः .... .... १८

(१२) कैतवापन्हुतिः .... .... १८-१९

(१३) उत्प्रेक्षा .... .... .... १९

(१४) गुप्तोत्प्रेक्षा .... .... १९

(१५) स्मृतिः .... .... ... २०

(१६) भ्रान्तिः .... .... .... २०

(१७) सन्देहः .... .... .... २०

(१८) मीलितम् ... .... .... २१


CC-0. Sampurnanand University Collection. Digitized by eGangotri

| विषयाः | | | पृष्ठम्. |
|---|---|---|---|
| (१९) उन्मीलितम् | .... | .... | २१ |
| (२०) अनुमानम् .... | .... | .... | २१ |
| (२१) अर्थापत्तिः | .... | .... | २२ |
| (२२) परिकरः .... | .... | .... | २२ |
| (२३) परिकरांकुरः | .... | .... | २२–२३ |
| (२४) काव्यलिङ्गम् | .... | .... | २३ |
| (२५) महर्पणम् .... | .... | .... | २३–२४ |
| (२६) विषादनम् .... | .... | .... | २४ |
| (२७) सामान्यम् .... | .... | .... | २४ |
| (२८) अतिशयोक्तिः— | .... | .... | २५–२६ |
| क. अक्रमातिशयोक्तिः | .... | .... | २५ |
| ख. अत्यन्तातिशयोक्तिः | .... | .... | २५ |
| ग. भेदकातिशयोक्तिः | .... | .... | २५–२६ |
| घ. रूपकातिशयोक्तिः | .... | .... | २६ |
| (२९) प्रौढोक्तिः | .... | .... | २६–२७ |
| (३०) तुल्ययोगिता | .... | .... | २७ |
| (३१) संभावनम् | .... | .... | २७ |
| (३२) दीपकम् | .... | .... | २७–२८ |
| (३३) आवृत्तिदीपकम् | .... | .... | २८ |
| (३४) प्रतिवस्तूपमा | .... | .... | २८ |
| (३५) दृष्टान्तः | .... | .... | २८–२९ |
| (३६) निदर्शना | .... | .... | २९–३० |
| (३७) व्यतिरेकः | .... | .... | ३० |
| (३८) सहोक्तिः .... | .... | .... | ३०–३१ |

CC-0. Sampurnanand University Collection. Digitized by eGangotri

| विषयाः | | | | | पृष्ठम्. |
|---|---|---|---|---|---|
| (३९) | विनोक्तिः | | .... | .... | ३१ |
| (४०) | समासोक्तिः | | .... | .... | ३१ |
| (४१) | श्लेषः | .... | .... | .... | ३१–३२ |
| (४२) | अप्रस्तुतप्रशंसा | | .... | .... | ३२ |
| (४३) | सामान्यविशेषः | | .... | .... | ३२ |
| (४४) | अर्थान्तरन्यासः | | .... | .... | ३३ |
| (४५) | पर्यायोक्तिः | | .... | .... | ३३ |
| (४६) | स्तुतिनिन्दा | | .... | .... | ३३ |
| (४७) | निन्दास्तुतिः | | .... | .... | ३४ |
| (४८) | आक्षेपः | .... | .... | .... | ३४ |
| (४९) | विरोधः | .... | .... | .... | ३४ |
| (५०) | विरोधाभासः | | .... | .... | ३५ |
| (५१) | असंभवः | .... | .... | .... | ३५–३६ |
| (५२) | विशेषोक्तिः | | .... | .... | ३६ |
| (५३) | विभावना | .... | .... | .... | ३६ |
| (५४) | असङ्गतिः | .... | .... | .... | ३६–३७ |
| (५५) | विषमम् | .... | .... | .... | ३७ |
| (५६) | समम् | .... | .... | .... | ३७–३८ |
| (५७) | विचित्रम् | .... | .... | .... | ३८ |
| (५८) | अधिकम् | .... | .... | .... | ३८ |
| (५९) | अन्योन्यम् | | .... | .... | ३८ |
| (६०) | विशेषः | .... | .... | .... | ३९ |
| (६१) | व्याघातः | .... | .... | .... | ३९ |
| (६२) | गुंफः | .... | .... | .... | ३९ |

CC-0. Sampurnanand University Collection. Digitized by eGangotri

| विषयाः | | पृष्ठम् |
|---|---|---|
| (६३) | एकावली .... .... .... | ४० |
| (६४) | मालादीपकम् ... .... | ४० |
| (६५) | सारः .... .... .... | ४०–४१ |
| (६६) | यथासंख्यम् .... .... | ४१ |
| (६७) | पर्यायः .... .... .... | ४१–४२ |
| (६८) | परिवृत्तिः .... .... .... | ४२ |
| (६९) | परिसंख्या .... .... .... | ४२–४३ |
| (७०) | विकल्पः .... .... ... | ४३ |
| (७१) | समाधिः .... .... .... | ४३–४४ |
| (७२) | समुच्चयः .... .... .... | ४४ |
| (७३) | प्रत्यनीकम् .... .... .... | ४४ |
| (७४) | प्रतीपम् .... .... .... | ४५ |
| (७५) | उल्लासः .... .... .... | ४५ |
| (७६) | पूर्वरूपता .... .... .... | ४५–४६ |
| (७७) | तद्गुणः .... .... .... | ४६ |
| (७८) | अतद्गुणः .... .... .... | ४६ |
| (७९) | अवज्ञा .... .... .... | ४६–४७ |
| (८०) | अनुगुणः .... .... .... | ४७ |
| (८१) | उत्तरम् .... .... .... | ४७ |
| (८२) | पिहितम् .... .... .... | ४७–४८ |
| (८३) | व्याजोक्तिः .... .... | ४८ |
| (८४) | वक्रोक्तिः .... .... .... | ४८–४९ |
| (८५) | स्वभावोक्तिः .... .... | ४९ |
| (८६) | भाविकम् .... .... .... | ४९–५० |


CC-0. Sampurnanand University Collection. Digitized by eGangotri

| विषयाः | | | पृष्ठम्. |
| --- | --- | --- | --- |
| (८७) भाविकच्छविः | .... | .... | ५० |
| (८८) उदात्तम् .... | .... | .... | ५० |
| (८९) अत्युक्तिः .... | .... | .... | ५०–५१ |
| ४ क्रमप्राप्तानां शब्दालङ्काराणामुदाहरणसङ्क्रमणपूर्वकं लक्षणादिनिरूपणम् । तत्र च— | | .... | |
| (१) चित्रालङ्काराः | .... | .... | ५१–५२ |
| (२) अनुप्रासः— | .... | .... | ५२–५४ |
| क. स्फुटानुप्रासः | .... | .... | ५२ |
| ख. लाटानुप्रासः | .... | .... | ५३ |
| ग. वृत्त्यनुप्रासः | .... | .... | ५३–५४ |
| घ. छेकानुप्रासः | .... | .... | ५४ |
| (३) यमकम् .... | .... | .... | ५५ |
| (४) पुनरुक्तप्रतीकाशः | .... | .... | ५५–५६ |
| ५ प्रार्थनापिपेक्षा स्वाशयप्रकाशनम् । | | .... | ५६ |
| ६ नामदेशादिकीर्तनं, द्वितीयस्या अलङ्कारभङ्ग्या भङ्ग्याः समाप्तिसूचनं ग्रन्थसमाप्तिश्च । | | .... | ५६ |


CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

॥ श्रीः ॥

श्रीरामदेवाऽपरपर्यायश्रीचिरञ्जीवभट्टाचार्यकृतः—

# काव्यविलासः ।

तमोगणविनाशिनी सकलकालमुद्योतिनी
धरातलविहारिणी जडसमाजविद्वेषिणी ।
कलानिधिसहायिनी लसदलोलसौदामिनी
मदन्तरवलम्बिनी भवतु काऽपि कादम्बिनी ॥१॥

अत्र रूपकातिशयोक्त्यलङ्कारेण श्रीकृष्णमूर्तिः प्रतीयते । किंशब्दोत्तराऽपिशब्दः स्वजातिमध्योत्कर्षमनिर्दिष्टस्वरूपत्वमद्भुतत्वं च द्योतयति । प्रकृतेरद्भुतत्वमितरकादम्बिन्यपेक्षया वैलक्षण्यम् । तदेवाह—तमःशब्देन संसारबन्धनजनकमज्ञानं प्रतीयते, आत्मस्वरूपादर्शकत्वात् । सकलकालमिति । व्याप्येति शेषः । क्रियाविशेषणं वा । सप्तम्यर्थे द्वितीया वा । श्लेषेण डलयोरैक्यमिति विरोधः । वास्तवार्थे जडा दैत्याः । हिताऽहितपरिज्ञानरहितो जडः । हितो धर्मः । अहितोऽधर्मः । वास्तवार्थे कलाश्चतुःषष्टिमिताः तासां निधयो गोपबाला देवाऽवतारत्वात् त एव सहायाः सहचरास्तेऽस्याः सन्तीति तथा । सौदामिनीशब्देन गोप्यः प्रतीयन्तेऽलोलत्वं मनसा शरीरेण चेति ॥

कृतिभिः कतिभिर्विलसन्मतिभिः
कति वा न कृताः कृतयः कविभिः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इति मत्कविताऽभिरुचिः शिथिली-
भविता जगतामिति चेत्कथयेत् ॥ २ ॥

कथयतु नाम, तावता नो नो दुनोति चेतः । यतः—

मणिं कलितनीलभं कमपि काचबोधान्मुहु-
स्त्यजन्ति यदि पामराः कथय कैव हानिस्तदा ।
यतो जगति कश्चन स्फुरितशुद्धबुद्ध्या जग-
त्परीक्षणविचक्षणः क्षणमपीक्षणं धास्यति ॥३॥

अलङ्काररसानेकवृत्त्यादिषु गुणेषु च ।
लक्ष्यन्ते स्वीयपद्यानि प्राचीनकृतलक्षणैः ॥४॥

तत्रादौ काव्यस्वरूपं निरूप्यते । यथा च काव्यप्रकाशे-

तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वाऽपि ।

अस्यार्थः—शब्दार्थौ तत् काव्यम् । अत्रोद्देश्यविधेयभावेनाऽन्वयान्न भिन्नलिङ्गवचनकृतो दोषः, 'वेदाः प्रमाणम्' इतिवत् । कीदृशौ तौ ? अदोषौ दोषरहितौ । दोषाः स्फुटदोषाश्च्युतसंस्कृतिप्रभृतयः । सगुणौ गुणसहितौ । गुणा ओजःप्रभृतयः । क्वापि पुनः क्वचित्पुनः । अनलङ्कृती अपि स्फुटालङ्काररहितावपि शब्दार्थौ काव्यं भवत्येव इति तु ये स्फुटालङ्कारवत एव काव्यत्वमामनन्ति तन्मतमपाकर्तुमुक्तम् । शारदागमप्रभृतिषु तु—

सरसाऽलङ्कारवती निर्दोषा गुणभूषिता ।
सरीतिर्लक्षणवती या वाक् सा काव्यनामभाक् ॥

रसग्रहणेन रसानुगुणभावादयोऽपि गृहीताः । एतन्मते रसरीतिलक्षणसत्त्वमावश्यकम् । दोषसहिते छन्दोबन्धादिविजृम्भिते गौणकाव्यप्रयोगवदरसादिमत्यपीत्याशयः । अतिनवीनास्तु—विलक्षणचमत्कारकारित्वमेव काव्यत्वमामनन्ति । अत

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एव विलक्षणचमत्कारकारिणि दोषसत्त्वे दुष्टं काव्यमिति प्रयोगः । न तु नैतत्काव्यमिति । सत्यपि च रसादौ विना विलक्षणचमत्कारमभिज्ञानां काव्यमिदमिति न प्रतीतिरपीति साधु वदन्ति ॥

काव्यप्रयोजनमाहुराचार्याः—

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥

कालिदासादीनामिव यशः, धावकादीनामिव धनं, भारव्यादीनामिव व्यवहारज्ञानं, मयूरादीनामिव शिवेतरस्याऽशिवस्य क्षतिः ॥

काव्यकारणमप्याहुः—

प्रतिभैव श्रुताभ्याससहिता कविताकरी ।

श्रुताभ्यासाभ्यां सहिता प्रतिभैव कवितामुत्पादयतीत्यर्थः । प्रतिभा संस्कारविशेषः । श्रुतं काव्यज्ञेभ्यः श्रवणम् । अभ्यासः पुनःपुनः परिशीलनम् । तदाहुरन्येऽपि—तां विना काव्यं न प्रसरेत्, प्रसरितमप्युपहासाय स्यादिति । अत्रेदमवधेयम्—क्वचिद्विनाऽपि श्रुताभ्यासौ देवताप्रसादादिनोत्पन्नप्रतिभया काव्योदयादिदं प्रायिकपरम् ॥

अथ पूर्वं काव्यस्वरूपसम्पादकतयोक्ता रसादयो निरूप्यन्ते। तत्र रसानाहुः । यथा—

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
रसा नव समुद्दिष्टा बीभत्साऽद्भुतशान्तयः ॥ इति ।

एवं रसानामनुगुणतया स्थायिभावादयो निरूप्यन्ते—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयश्चेति निर्वेदः स्थायिभावकः ॥५॥

अमी शृङ्गारादिषु क्रमेणैव स्थायिभावा भवन्तीत्यर्थः । एत एव स्थायिभावा विभावाद्यैः परिपूर्णा रसरूपत्वेन परिणमन्ति, यथा सुवर्णादयः कुण्डलादित्वेनेति । यदुक्तम्—

परिपुष्टो विभावाद्यैः स्थायिभावो रसो मतः । इति ॥

आलम्बनोद्दीपनात्मा विभावः कारणं द्विधा ।
कार्योऽनुभावश्चैतेषां सहायो व्यभिचार्यथ ॥६॥

विशेषेण भावयति उत्पादयति रत्यादीनिति व्युत्पत्त्या सिद्धो विभावः कारणस्वरूपः । स च द्विविधः—आलम्बनोद्दीपनात्मा । आलम्बनस्वरूप उद्दीपनस्वरूपश्च । यदालम्ब्य रत्यादिर्भवति तदालम्बनम् । यथा शृङ्गारे कान्तादि । यत् रत्यादिकमुद्दीपयति तदुद्दीपनम् । यथा शृङ्गारे स्रक्चन्दनोद्यानादि । अनु पश्चाद्भाव उत्पत्तिर्यस्येति व्युत्पत्त्याऽनुभावः कार्यरूपः । यथा शृङ्गारे कटाक्षादि । कदाचिदितररससाधारणोऽपि भवतीति व्यभिचारी रत्यादीनां सहकारी । यथा शृङ्गारे उन्मादादि । हास्यादीनां तु विभावादयस्तत्तन्निरूपणकाले वक्तव्याः ॥

अथ शृङ्गारादीनां क्रमेणैव लक्षणोदाहरणानि—

रत्याख्यः स्थायिभावात्मा वल्लभादिविभावजः ।
कटाक्षाद्यनुभावश्चोन्मादादिव्यभिचारिभाक् ॥
सम्भोगो विप्रलम्भश्च शृङ्गारो द्विविधो रसः ॥७॥

यस्य रतिः स्थायिभावः, कान्तादिर्विभावः, कटाक्षादिरनुभावः, उन्मादादिर्व्यभिचारिभावः स रसः शृङ्गारः । स च द्विविधः—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सम्भोगो विप्रलम्भश्च । सम्भोगस्तु कान्तयोः परस्परालोकनस्पर्शनचुम्बनादिभिरनेकविधः । सम्भोगो यथा माधवचम्पूग्रन्थे—

सरसं दरचालिताङ्गुली वदनाच्छादनचालनेन सा ।
शयिता दयिताऽऽननं मुदा नयनमुन्मीलितलोचनेक्षते ॥

कान्तकृतः शृङ्गारस्तद्भिन्नायां यथा—

आलोकयाऽऽननसुधाकरपानकाले
बाले ! विलोचनविलोलचकोरचञ्चोः ।
मुक्ताच्छलेन नियतं तव नासिकान्तः—
पीयूषबिन्दुरभितो गलितो विभाति ॥

विप्रलम्भस्तु द्विविधः—भाविवियोगसम्भावनातो वियोगाच्च ।
आद्यो यथा माधवचम्पूग्रन्थे—

यामीत्युक्ते कथमपि सकृत्प्राणनाथे निशीथे
बाला म्लाना स्रगिव कलिता भानुभिर्भानवीयैः ।
आनम्रास्यं करकिसलयन्यस्तताम्बूलगुच्छं
चित्रारूढाऽऽकृतिरिव परं भित्तिमालम्ब्य तस्थौ ॥

द्वितीयो यथा तत्रैव—

आलीचालितपद्मिनीदलचलत्सर्वाङ्गमङ्गीकृत—
स्वाङ्गालिङ्गनमर्मरीकृतनवाम्भोजालिशय्या चिरात् ।
चैतन्यं कथमप्युपेत्य शनकैरुन्मील्य नेत्राञ्चलं
बाला केवलमेव शून्यहृदया शून्यं जगत् पश्यति ॥

इति शृङ्गाररसः ॥

हासस्थायी रसो हास्यो विभावाद्यैर्यथाक्रमम् ।
वैरूप्यफुल्लगण्डत्वाऽवहित्थाद्यैः समन्वितः ॥ ८ ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यस्य हासः स्थायिभावः, वैरूप्यं विभावः, फुल्लकपोलत्वादिरनुभावः, अवहित्थादिर्व्यभिचारिभावः । अवहित्था ऽऽकारविशेषसङ्गोपनम् । स रसो हास्यः । यथा—

दिगम्बरो बद्धजटाकिरीटो भस्माङ्गरागः फणिभूषणाढ्यः ।
जरास्खलत्पुङ्गववाहनेन समागतो गौरि ! वरस्तवाऽयम् ॥

इति हास्यरसः ॥

अभीष्टविप्रयोगाश्रुपातग्लान्यादिभिः क्रमात् ।
विभावाद्यैर्युतः शोकस्थायी स्यात्करुणो रसः ॥ ९ ॥

यस्य शोकः स्थायिभावः, अभीष्टस्य पुत्रादेर्विप्रयोगो विभावः । विप्रयोगस्तु द्विविधः—दूरगमनादिरूपो मरणरूपश्च । अत्र पुत्रादेर्दूरगमने न करुणः किं तु भावविशेष इत्यन्ये । अश्रुपातादिरनुभावः, ग्लान्यादिर्व्यभिचारिभावः स करुणः । यथा माघवत्सप्रग्रन्थे—

अयि जीवित ! पामरोऽपरो भवता कोपि समो न वीक्ष्यते ।
यदुपेक्ष्य भवान् स्थितो दिवं गतमेकाकितया निजेश्वरम् ॥

यथा च विप्रलम्भः करुणो नाऽन्तर्भवति तदग्रे वक्ष्यामः । इति करुणरसः ॥

क्रोधस्थायी रसो रौद्रो विभावाद्यैः समन्वितः ।
मात्सर्यहस्तनिष्पेषसंमोहाद्यैर्यथाक्रमम् ॥ १० ॥

यस्य क्रोधः स्थायिभावः, मात्सर्यं विभावः, हस्तनिष्पेषवाक्याडम्बरादिरनुभावः, संमोहादिर्व्यभिचारिभावः स रसो रौद्रः । यथा—

स्तम्भादुत्प्लुत्य गर्जद्भ्रुकुटिकुटिलितप्रेक्षणः स क्षणेन
प्रोद्यद्दैत्येन्द्रवक्षःखरतरनखरैर्जृम्भितः संविदार्य ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

उत्कृत्योत्कृत्य मांसं शकटमभिनटन्नुत्कटो न्युत्कपाटं
दंष्ट्रासन्दष्टमश्नन् नृहरिरवतु वः कष्टतः स्पष्टमिष्टः ॥

इति रौद्ररसः ॥

उत्साहाख्यः स्थायिभावः प्रभावादिविभावभूः ।
धैर्योऽनुभावो वीरः स्याद् गर्वादिव्यभिचारिभाक् ॥११॥

यस्य उत्साहः स्थायिभावः, प्रभावादिर्विभावः, धैर्यादिरनुभावः, गर्वादिर्व्यभिचारिभावः स रसो वीरः । स च त्रिविधः— युद्धवीरो दानवीरो दयावीरश्चेति । तत्राद्यो यथा—

मदान्धकरिचीत्कृतिस्फुरितसङ्गरमाङ्गणे
धनुर्धरधुरन्धरैर्यदपि गर्जितं तर्जितम् ।
तथाऽपि यशवन्तभूदयित एव किञ्चित्स्मितं
मितंमितमुदीरयन् धनुरनुस्मरन्वीक्षते ॥

द्वितीयो यथा—

गौडश्रीयशवन्तसिंहनृपतेः पश्याऽद्य दानोत्सवे
चक्षुर्याचिनि सम्पतति प्रतिदिशं देहीति वाक्ये श्रुतिः ।
देयंदेयमितीरितेषु रसना चाऽऽनन्दसिन्धौ मनो
धावद्याचकवृन्दपाणिषु परं पाणिः परिक्रीडते ॥

तृतीयो यथा माधवचम्पूग्रन्थे—

उदञ्चत्कल्लोलैस्त्रिदशपतिमुद्दिश्य विनयी
पुरः स्वीयामेव प्रथयति तनुं निष्क्रयविधौ ।
अधोऽञ्चत्कल्लोलैर्भयतरलमाश्वासयितुमु-
त्सपक्षं मैनाकं पुनरयमधो याति जलधिः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

दयायां करुणाव्यवहारस्तु गौण एव। न तु दया करुणो-ऽप्यन्तर्भवति, दयाया उत्साहः करुणस्य तु शोक इति भेदात्। इति वीररसः॥

व्याघ्रादिभिर्विभावैस्तु कम्पाद्यैरनुभावकैः।
मोहादिव्यभिचारी च भयस्थायी भयानकः॥ १२॥

यस्य भयं स्थायिभावः, व्याघ्रादिर्विभावः, कम्पादिरनुभावः, संमोहादिर्व्यभिचारिभावः स रसो भयानकः। यथा तत्रैव—

न पश्यति तरङ्गिणीं न च गिरिं न खातोदरं
न भालयति वा कचिन्मृगपतिं पुरस्तादयम्।
मुहुर्मनसि भावयन्निजविपत्तिचेष्टामहो
पलायनपरः करी विकलधीः परं धावति॥

इति भयानकरसः॥

स्थायी जुगुप्सा बीभत्से विभावाद्या यथाक्रमम्।
अनिष्टेक्षणनिष्ठीवसंमोहाद्याः प्रकीर्तिताः॥ १३॥

यस्य जुगुप्सा स्थायिभावः, अनिष्टस्य कदर्यवस्तुन ईक्षणं दर्शनं तदेव विभावः, निष्ठीवादिरनुभावः, संमोहादिर्व्यभिचारिभावः स रसो बीभत्सः। यथा—

इयं व्याधदारा विकारानुपेता
मृगान्त्रालितन्त्रा सकङ्कालमाला।
अतिव्यात्तवक्त्रा दिशि क्षिप्तनेत्रा
समुत्कृत्य मांसं पिशाचीव भुङ्क्ते॥

इति बीभत्सरसः॥

अद्भुतो विस्मयस्थायी मायादिकविभावभूः।
रोमाञ्चाद्यनुभावोऽपि स्तम्भादिव्यभिचारकः॥ १४॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यस्य विस्मयः स्थायिभावः, नटादिकृतमायादिर्विभावः, रोमाञ्चादिरनुभावः, स्तम्भादिर्व्यभिचारिभावः स रसोऽद्भुतः । यथा कल्पलतायाम्—

आकाशे पुष्पराजी रचयति दिवसे तारकालीर्निशायां
भूमीपृष्ठे विवस्वत्तुहिनकिरणयोः कोटिबिम्बं तनोति ।
हस्तन्यस्तारविन्दे जनयति कमलानर्तनं वर्तमानं
सूच्यग्रेषु द्विपानां शतमपि शतधा मायिकोऽयं किमेतत् ॥

इत्यद्भुतरसः ॥

**निर्वेदस्थायिकः शान्तः सत्सङ्गादिविभावभूः ।**
**क्षमादिकानुभावोऽयं स्तम्भादिव्यभिचारिकः ॥१५॥**

यस्य निर्वेदः स्थायिभावः । निर्वेदस्तु आत्मनोऽवमाननं, संसारे हेयत्वबुद्धिर्वा । सत्सङ्गादिर्विभावः, क्षमादिरनुभावः, स्तम्भादिर्व्यभिचारिभावः स रसः शान्तः । यथा शिवस्तोत्रे—

समालभ्य प्रीतीरमरतटिनीतीरशकले
दिनान्ते शाकाशी क्वचिदपि च काशीपरिसरे ।
निमेषार्द्धं गङ्गाधरचरणसङ्गाञ्चितमनो
मनाग्याचे पूतं नियतमभिभूतं कुमतिभिः ॥

इति शान्तरसः ॥

अथैषां रसानां रूपाणि दैवतानि च कथ्यन्ते ।

**रसास्तु श्यामस्फटिकपारावतविचित्रिताः ।**
**आरक्तगौरमलिननीलगौरासिताः क्रमात् ॥ १६ ॥**
**विष्णुर्मारुतवरुणौ रुद्रः शाकस्तदनु कृतान्ताख्यः ।**
**महाकालो विधाता ब्रह्मेति दैवतं रसानाम् ॥ १७ ॥**



CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्र केचित्—शान्त इव मायाऽपि दशमो रसः । मिथ्याज्ञानमत्र स्थायिभावः, सांसारिकभोगधर्माधर्मादिर्विभावः, पुत्रकलत्रराज्यादिरनुभावः, मनोरथादिर्व्यभिचारिभावः—इति वदन्ति । उदाहरन्ति च—

बालालाटीदृगम्भोरुहरभसकरी वापिका काऽपि कान्ता
तल्पं चन्द्रानुकल्पं प्रकटयति मिथः कामिनीकामनीतम् ।
रूपं कामानुरूपं प्रणिगणभवनं बन्धुरं बन्धुरङ्गो
लोके लोकेश कस्य त्वमसि न भुवने सर्वदा सर्वदाता ॥

इत्यादौ । पद्यं चेदं प्राचीनम् । अत्रेदं चिन्त्यम्—मायाया अनादित्वेनाऽजन्यत्वाद्रसत्वासम्भवः । रसास्तु सर्वे जन्या एव । कथं वा कथयेन्मिथ्याज्ञानादिर्मायायाः कारणमिति शास्त्रविरुद्धत्वात् । वस्तुतस्तु आलङ्कारिकाणां मते रसो नित्य आनन्दरूपः । अतस्तस्य ब्रह्मस्वरूपत्वेन मायाया रसत्वाऽसम्भवः । माया हि तुच्छा विनाशशालिनी ब्रह्मभिन्नैवेति दिक् । अत एव प्राचीनसाम्प्रदायिकैरपि नवैव रसाः कथिताः ॥

ननु विप्रलम्भशृङ्गारः करुण एवाऽन्तर्भवतु रुदितविलापादेस्तत्रापि सत्त्वादिति चेन्न, करुणे शोकः कारणं, विप्रलम्भे शोकरूपकारणस्याऽभावात् । ननु इष्टविश्लेषजनितमनोविकारविशेष एव शोकः, स च विप्रलम्भेऽस्त्येव चेत्, न हि शोकः केवलमिष्टविश्लेषजनितमनोविकार विशेष एव । अपि तु इष्टविश्लेषजनितो रत्यनालिङ्गितो मनोविकारविशेष एव । तथा च विप्रलम्भजनकमनोविकारस्य रत्यालिङ्गितत्वेन शोकत्वाभावः । विश्लिष्टे कान्ते रतित एव मनोविकारोदयात् । ननु तर्हि मृतेऽपि कान्तयोरन्यतरस्मिन् शोको न स्यात् । अत एव न स्याच्च करुणो रसः, स्याच्च विप्रलम्भ एव

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तत्र रतिसत्त्वादिति चेन्न, मृते तु कान्तयोरन्यतरस्मिन् रतेरेवाऽभावात्। रतिस्तु इष्टसमीहाजनितमनोविकार एव। तथा च कान्तयोरन्यतरस्मिन् मृते पुनर्मेलनस्याऽसम्भावितत्वेन ज्ञानात्, इष्टसमीहाया एवाऽसम्भवः। अत एव रत्यभावान्न विप्रलम्भः, किं तु करुण एव। यदि पुनर्मेलनसम्भावनाऽपि भवति तदा भवत्येव विप्रलम्भः। नन्वेवं सति पुत्रादावपि विदेशं गते करुणरसो न स्यात्तत्राऽपि पुत्रादिरूपं यदिष्टं तत्समीहाजनितमनोविकार-सत्त्वात्। स्याच्च विप्रलम्भो रस इति चेन्न, इह हि रतिर्नेष्टमात्र-समीहाजनितमनोविकारः किं तु कान्तकान्तान्यतरसमीहाजन्यम-नोविकार एवेति न दोषलेशोऽपीति बोध्यम्॥

रतिर्देवादिविषया भाव इत्यभिधीयते॥ १८॥

अत्राऽऽदिना नृपपुत्रगुरुमित्रादिपरिग्रहः। देवविषया यथा शिवस्तोत्रे—

न सा मुक्तिः साध्वी त्रिपुरहर! माध्वीकसुभगा
न यस्यां त्वद्भक्तिः प्रभवति न वक्ति त्वदभिधाम्।
अये गौरीबन्धो! मम स भवबन्धोऽपि सुभगः
क्षणं यस्मिंश्चेतः कलयति तवैतः पदयुगम्॥

नृपविषया यथा—

यद्यप्येतां भूमीमनु जयति भूमीपतिशतं
धनानां मानानामविरतमितो दानरसिकम्।
तथाऽप्येतं त्यक्तुं कथमपि न वाञ्छा समुदय-
त्यभिज्ञं विज्ञानां नृपतियशवन्तं क्षणमपि॥

पुत्रविषया यथा माधवचम्पूग्रन्थे—

उदञ्चत्कल्लोलैर्निजतनुजवात्सल्यवशगः
करोति प्रारम्भं सुरपुरमुपेतुं जलनिधिः।

आगमसंख्या...
77905

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अधोञ्चत्कल्लोलैरयमहह धीरश्चपलता-
परीवादाद्भीतः कथमपि पराञ्चित्तिमयते ॥

गुरुविषया यथा—

इमौ भट्टाचार्यप्रवररघुदेवस्य चरणौ
शरण्यौ चित्तान्तर्निरवधि विधाय स्थितवतः ।
किमन्यैर्वाग्देवीप्रमुखमखभाजां प्रभजनैः
परिस्फूर्त्यै वाचाममृतलहरीनिर्झरजुषाम् ॥

एवं मित्रादिविषयापि बोध्या । रसानामधिकविशेषं ग्रन्थस्यान्ते विवेचयिष्यामः ॥

द्वैताऽद्वैतमतादिनिर्णयविधिप्रोद्बुद्धबुद्धिः श्रुतो
भट्टाचार्यशतावधान इति यो गौडोद्भवोऽभूत्कविः ।
ग्रन्थे काव्यविलाससंज्ञिनि चिरञ्जीवेन तज्जन्मना
सर्वाद्या रसभङ्गिरेव कवितारम्भाय सम्भाविता ॥१९॥

इति श्रीचिरञ्जीवभट्टाचार्यकृतकाव्यविलासे
रसमयी प्रथमा भङ्गिः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

## अथ द्वितीया भक्तिः ।

अथाऽलङ्कारा निरूप्यन्ते । ते चाऽर्थालङ्कारशब्दालङ्कारभेदेन द्विविधाः ।

भूष्यन्ते काव्यरूपाणि विना तैः स्याद्विरूपता ।
अलङ्कारा इति ख्यातास्तस्मात्ते योषितामिव ॥ १ ॥

अस्याऽर्थः—तैरुपमादिभिः काव्यरूपाणि काव्यस्वरूपाणि भूष्यन्ते तैर्विना काव्यरूपेषु विरूपताऽपि स्यात् । तस्मात्तेऽलङ्कारा इति ख्याता योषितामलङ्कारा इव ।

उपमाऽनन्वयश्चैव प्रतीपलक्षितोपमे ।
रूपकं परिणामश्चोल्लिखितापन्हुतिस्ततः ॥ २ ॥
छेकापन्हुतिपर्यस्तापन्हुती कैतवेन सा ।
उत्प्रेक्षा च स्मृतिभ्रान्तिसन्देहा मीलितं तथा ॥ ३ ॥
उन्मीलितानुमाने ऽर्थापत्तिः परिकरस्तथा ।
तदङ्कुरः काव्यलिङ्गं प्रहर्षणविषादने ॥ ४ ॥
सामान्यातिशयोक्ती च प्रौढोक्तिस्तुल्ययोगिता ।
अथ संभावनं ज्ञेयं दीपकावृत्तिदीपके ॥ ५ ॥
प्रतिवस्तूपमा चैव दृष्टान्तश्च निदर्शना ।
व्यतिरेकः सहोक्तिश्च विनोक्तिस्तदनन्तरम् ॥ ६ ॥
समासोक्तिरथ श्लेषः प्रशंसाऽप्रस्तुतस्य च ।
स्यात्सामान्यविशेषश्च न्यासोऽप्यर्थान्तरस्य च ॥ ७ ॥
पर्यायोक्तिः स्तुतिर्निन्दा निन्दास्तुतिरतः परम् ।
आक्षेपश्च विरोधश्च विरोधाभास एव च ॥ ८ ॥
असंभवो विशेषोक्तिर्विभावनमसङ्गतिः ।
विषमं च समं चैव विचित्रमधिकं तथा ॥ ९ ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अन्योन्यं च विशेषश्च व्याघातो गुम्फ एव च ।
एकावली तथा मालादीपकं सार एव च ॥ १० ॥
यथासङ्ख्यं च पर्यायः परिवृत्तिरतः परम् ।
परिसङ्ख्या विकल्पश्च समाधिश्च समुच्चयः ॥ ११ ॥
प्रत्यनीकं प्रतीपश्च उल्लासः पूर्वरूपता ।
तद्गुणाऽतद्गुणौ तद्वदवज्ञाऽनुगुणौ तथा ॥ १२ ॥
उत्तरं पिहितं चैव व्याजोक्तिस्तदनन्तरम् ।
वक्रोक्तिश्च स्वभावोक्तिर्भाविकं भाविकच्छविः ॥१३॥
उदात्तश्चाऽत्युक्तिरमी अलङ्काराः प्रकीर्तिताः ।
चित्राऽनुप्रासयमका नानाभेदविलक्षणाः ॥१४ ॥
पुनरुक्तप्रतीकाशः शाब्दे त्वेते प्रकीर्तिताः ।

अथैषामलङ्काराणां क्रमेण लक्षणोदाहरणानि ।

उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः ॥ १५ ॥

अस्याऽर्थः—यत्र द्वयोरुपमानोपमेययोः सादृश्यलक्ष्मीरुल्लसति सादृश्यं प्रकटमेव भासते तत्रोपमालङ्कारः । यदीयं सादृश्यमन्यत्र वर्ण्यते तदुपमानम् । यस्मिन् सादृश्यमन्यस्य वर्ण्यते तदुपमेयम् । सादृश्यं तु तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम् । सादृश्यव्यञ्जकाश्च इवादिशब्दाः । यत्राऽमी सर्वेऽपि तत्र पूर्णोपमा । यत्र चैषामेकतरं नास्ति तत्र लुप्तोपमा । पूर्णोपमा यथा कल्पलतायाम्—

उदितानन्दसन्दोहस्तिमितारुणलोचना ।
इयं गायति तन्वङ्गी कोकिलेव कलस्वरम् ॥

अत्रोपमानं कोकिला, उपमेया तन्वङ्गी, सादृश्यं कलस्वरगानं, व्यञ्जक इवशब्दः—इति भवत्येषा पूर्णोपमा । चन्द्रमुखी-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

त्यादौ लुप्तोपमाः, तासामुदाहरणं ग्रन्थबाहुल्यभिया विशिष्य न दीयते ॥

**उपमानादभिन्ने स्यादुपमेये त्वनन्वयः।**

उपमानादुपमेयेऽभिन्ने सति अनन्वयालङ्कारः स्यात्। यथा तत्रैव—

समतां त्वयि कर्णोऽस्य वर्णयन्ति बलेरपि।
मन्यते तु गुणैस्तैस्तैर्भवानिह भवानिव ॥

अत्र भवत्पदसम्बोध्यस्यैव राज्ञ उपमानत्वमुपमेयत्वं चेति भवत्यनन्वयालङ्कारः ॥

**उपमानोपमेयत्वे स्यात्प्रतीपोपमा तदा ॥ १६ ॥**

उपमाने उपमेयत्वे सति उपमानत्वेन प्रसिद्धस्योपमेयत्वे कथने कृते सति प्रतीपोपमालङ्कारः। यथा—

तदास्यसदृशं दृष्टं सरसीषु सरोरुहम्।
किञ्च तत्पुलिने खेलत्खञ्जना नयनोपमाः ॥

प्रसिद्धमुपमानं सरोरुहमुपमेयं मुखम्। इह तु तद्विपरीतं मुखसदृशत्वेन सरोरुहस्योक्ततया, एवं खञ्जननयनयोरपीतीह भवति प्रतीपोपमालङ्कारः ॥

**उपमाने तु लीलादिपदाढ्ये ललितोपमा।**

उपमाने लीलादिपदयोगे सति ललितोपमा भवति। लीलादीत्यादिना स्पर्द्धाविलासादिपरिग्रहः। यथा माधवचम्पूग्रन्थे—

आलीनां पुरतः कुतूहलवशात् कर्णान्तकण्डूमिषा—
दङ्गुल्या दरचालितस्य सहसा चेलाञ्चलस्यान्तरे।
एतस्याः नयनीत्तयाक्षयमिदं त्वां वीक्षितुं सर्वतः
खेलन्मञ्जुलखञ्जरीटयुगलस्पार्द्धि स्फुटं लक्ष्यते ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्रोपमेयेक्षणद्वयस्योपमाने खञ्जरीटयुगले स्पर्द्धीतिपदयोगेन भवति ललितोपमा ॥

रूपकं स्यादैक्यबोधे उपमानोपमेययोः ॥ १७ ॥

उपमानोपमेययोरैक्यबोधेऽभेदबोधे रूपकालङ्कारः स्यात् । यथा—

प्रतापोग्रदावानलप्रबलदग्धारितृणातः
समुद्गच्छद्धूमाञ्जनितगगनप्राङ्गणभुवि ।
स्फुलिङ्गाभास्ताराः परित इति सम्भाषणपरा—
स्तवाऽरीणां दारा हृदयनृपकारागृहगताः ॥

अत्र प्रताप एवोग्रदावानल इति समासवशादुपमेयस्य प्रतापस्योपमानस्य चोग्रदावानलस्याऽभेदः प्रतीयते इति भवति रूपकालङ्कारः । एवमरितृणयोरपि ॥

परिणामो भवेद्रूप्याद्रूपके व्यवधानगे ।

यत्राऽभेद आरोप्यते तद्रूप्यम् । यस्याऽभेद आरोप्यते तद्रूपकम् । तस्मात्तस्मिन् व्यवधानगे सति परिणामालङ्कारः । यथा शृङ्गारतटिन्याम्—

गमनोद्यमभाजि जीवितेशे वनितानां नमदाननं स्थितानाम् ।
अरुणाम्बुजशोभिलोचनान्तर्जलधारैव बभूव दुर्दिनश्रीः ॥

अत्र रूप्यरूपकयोर्जलधारादुर्दिनश्रियोर्बभूवेत्यनेन व्यवहितत्वात् परिणामालङ्कारः । अत्र केचित् परिणामस्य लक्षणान्तरं वदन्ति ॥

बहुभिर्बहुधारोपादेकस्योल्लिखिता मता ॥ १८ ॥

एकस्य बहुभिर्बहुधाऽऽरोपादनेकविधत्वकथनादुल्लिखितालङ्कारः । बहुभिरित्युपलक्षणम् । यथा—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सुधांशुः स्वपक्षैर्विपक्षैस्तु कालो
विचिन्त्योऽसि चिन्तामणिर्याचमानैः ।
स्मरो मानिनीभिः प्रियः कामिनीभि-
र्धनुर्वेदमूर्तिर्धनुर्वेदविद्भिः ॥

अत्रैकस्य नृपस्य स्वपक्षादिभिर्बहुभिः चन्द्रादित्वेन नानाविधतयाऽऽरोपादुक्तवस्तुल्लिखितालङ्कारः ॥

अतथ्यमारोपयितुं तथ्यापास्तिरपन्हुतिः ।

असत्यमारोपयितुं सत्यस्याऽपास्तिरपलापो यत्र तत्राऽन्हुतिरलङ्कारः । यथा—

चन्द्रे कलङ्कं कथयन्ति मूढा वयं वदामोऽमृतमात्रलोभात् ।
तद्रश्मिसुभ्रान्तपथेन गत्वा पिपीलिका चुम्बति चन्द्रबिम्बम् ॥

अत्र चन्द्रे कलङ्कं कथयन्ति ते मूढा अज्ञा इत्युक्त्वा चन्द्रे वास्तवं कलङ्कमपलप्य अवास्तवस्य पिपीलिकाचुम्बनस्याऽऽरोपः कृत इति भवत्यपन्हुतिरलङ्कारः । अत्र पिपीलिकेत्येकवचनोल्लेखो जातिमादायेति नैकपिपीलिकाकृतचुम्बनसम्भावनाकृतो दोषः ॥

भ्रान्तापन्हुतिरन्यस्य शङ्कायां भ्रान्तिवारणे ॥ १९ ॥

अन्यस्य भ्रान्तस्य शङ्कायां जातायां सत्यां सत्यवस्तुकथनाद्भ्रमविषयीभूतस्याऽपलापेन भ्रमनिवारणे कृते सति भ्रान्तापन्हुतिरलङ्कारः । यथा—

कलस्वरं गायति कोकिलाली तेनैव विश्राम्यति मानसं मे ।
वर्षासु किं कूजति या पिकाली न सा पिकाली तु सखी तदाख्या ॥

अत्र कोकिलाख्या आली गायतीत्युक्ते कोकिलपङ्क्तिरिति भ्रान्त्या पृच्छन्त्याः कस्याश्चिद् भ्रमविषयीभूतां पिकालीमपलप्य



CC-0. Sampurnanand University Collection. Digitized by eGangotri

सत्यभूतां कोकिलाख्यामालीमुक्त्वा भ्रमनिवारणं कृतमिति भवति भ्रान्तापन्हुतिरलङ्कारः ॥

छेकापन्हुतिरन्यस्य शङ्कया तथ्यनिन्हवे ।

यत्राऽन्यस्य शङ्कया भीत्या तथ्यस्य निन्हवोऽपलापस्तत्र छेकापन्हुतिरलङ्कारः । यथा—

अयाऽऽयातो निशि द्वारि जल्पन्मधुरमानतः ।
सन्तुष्टः सखि! किं कान्तो न हि हन्त स कोकिलः ॥

अत्र काचित् सखीं प्रति स्वव्रृत्तमयाथात इत्यर्थेनाऽकथयत् । पुनरन्ययोद्भावितं तथ्यभूतं कान्तं नहीत्यनेनाऽपलप्याऽतथ्यस्य कोकिलस्य कथनाद्भवति छेकापन्हुतिरलङ्कारः ।

पर्यस्तापन्हुतिर्यत्र धर्ममात्रं निषिध्यते ॥ २० ॥

यत्र धर्म्येव निषिध्यते न तु धर्मस्तत्र पर्यस्तापन्हुतिरलङ्कारः । यथा—

कृपारामक्षोणीपतियशसि शश्वत्स्वमहसा—
ऽनवद्येनाऽऽविद्योतयति जगतीमत्र सहसा ।
सुधाधामेत्येवं स्फुरितमपि राकानिशि परं
कलङ्केनाऽलं कः कलितममुमन्तः कलयति ॥

अत्र राज्ञो यशसि जगतीं विद्योतयति सति कलङ्केन कलितममुं सुधाधामेति कः कलयति, न कोऽपीत्यर्थः, इत्यनेन वास्तवं चन्द्ररूपधर्मिणं निषिद्ध्य यशस एव चन्द्रस्वरूपत्वकथनेन भवति पर्यस्तापन्हुतिरलङ्कारः ॥

कैतवापन्हुतिर्यत्र व्याजाद्युत्कीर्तनं भवेत् ।

यत्र व्याजमिषच्छलादिशब्देन वास्तवस्याऽपन्हवस्तत्र कैतवापन्हुतिरलङ्कारः । यथा माघचक्रग्रन्थे—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मध्यात्समानीय सुसारभागं वक्षोजमुत्पादयिता विधाता ।
अतिप्रयत्नात्त्रिवलीमिषेण सोपानवर्त्मत्रितयं चकार ॥

अत्र मिषेणेतिशब्देन त्रिवल्याः अपलापः कृत इति भवति कैतवापन्हुतिरलङ्कारः ॥

किञ्चित्सम्भाव्यते यत्र तत्रोत्प्रेक्षां प्रचक्षते ॥ २१ ॥

यत्र कस्यचिद्वस्तुनः संभावनामात्रं क्रियते 'बहुधा इदं भविष्यती'त्यादिना तत्रोत्प्रेक्षालङ्कारः । संभावनाव्यञ्जकास्तु—

नूनं प्रायो ध्रुवं मन्ये शङ्के जाने इवादिकाः ।
संभावनां व्यञ्जयन्ति प्रतीमो बहुधेति च ॥

यथा माधवचम्पूग्रन्थे—

प्रायोऽनीकभरेण भुग्नशिरसोऽप्याशीविषाधीशितुः
प्रोच्छ्वासानिलघूर्णिता वसुमती व्योमेदमारोहति ।
किं वा योधपरम्परासमुदितक्रोधानलादुत्थितो
धूमोऽयं करिकर्णतालपवनोद्धूतो वियद्गाहते ॥

अत्र तादृशशेषनागस्य श्वासानिलेन घूर्णिता पृथ्वी प्राय आकाशमारोहतीति धूलीधोरणीमालोक्य देवतानां संभावनेति भवत्युत्प्रेक्षालङ्कारः । प्रायःशब्दश्चाऽत्र व्यञ्जकः ॥

व्यञ्जकानामभावे तु गुप्तोत्प्रेक्षां प्रचक्षते ।

व्यञ्जकपदाभावे संभावनायां सत्यां गुप्तोत्प्रेक्षालङ्कारः । यथा—

हृदयेश ! धराधीशप्रतापोत्तापकातराः ।
प्रत्येकमुदयं यान्ति द्वादशाऽपि दिवाकराः ॥

अत्र प्रतापोत्तापादिव कातरा इति संभावनाऽस्ति, व्यञ्जकपदाप्रयोगश्चेति भवति गुप्तोत्प्रेक्षालङ्कारः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्यात्स्मृतिभ्रान्तिसन्देहैस्तदेवाऽलङ्कृतित्रयम् ॥२१॥

वर्णितया स्मृत्या स्मृत्यलङ्कारः । वर्णितया भ्रान्त्या भ्रान्त्यलङ्कारः । वर्णितेन सन्देहेन सन्देहालङ्कारो ज्ञेय इत्यर्थः । तत्र स्मृतिर्यथा माधवचम्पूग्रन्थे—

नासाग्रन्यस्तदृष्टेः स्वविषयविकलीभूतबाह्येन्द्रियाया
किञ्चित्किञ्चिद्दधत्याः पुलकमपि तनौ भित्तिमालम्बितायाः ।
कालिन्दीकूलकुञ्जे निरवधि भवतश्चेष्टितं यद्यदासी-
दन्तस्तत्तत्स्मरन्त्याः क्षणमिव दिवसा यान्ति तस्याः कदाचित् ॥

अत्र विरहिण्याः पूर्वचरितस्मरणवर्णनेन भवति स्मृत्यलङ्कारः ॥

भ्रान्त्यलङ्कारो यथा तत्रैव—

मन्दमाकलितकङ्कणक्वणं चञ्चलेन वसनाञ्चलेन सा ।
तत्र दीपकलिकाभ्रमान्मुहुश्चेष्टते मणिशिखाविलोपने ॥

अत्र नवोढाया गृहस्थमणिशिखासु दीपकलिकाभ्रमवर्णनेन भवति भ्रान्त्यलङ्कारः ॥

सन्देहालङ्कारो यथा—

त्वयानीतो देवः किमिह वद लक्ष्मीपरिवृढः
कृपादृष्टिर्जाता किमथ यशवन्तक्षितिपतेः ।
समन्तात्खेलन्ती तव भवनमासाद्य कमला
यदेषा लीलाऽपि क्षणमिव दिनानि क्षपयति ॥

अत्र विष्णोरानयनस्य यशवन्तनृपतेः कृपादृष्टिपातस्य वा फलमिदम् । तादृश्या अपि कमलायाः क्षणतुल्यतया दिनानां यापनमिति सन्देहवर्णनाद्भवति सन्देहालङ्कारः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

**मीलितं यदि सादृश्येनाऽभिभूतं न लक्ष्यते ।**

यदि स्वसदृशधर्मान्तरेणाऽभिभूतं वस्तु न लक्ष्यते न ज्ञायते तर्हि मीलितालङ्कारो भवति । यथा शृङ्गारसदिन्याम्—

कुचयोरतिगौररूपयोर्घनकाश्मीरजयोर्विलेपनम् ।
कुरुते स्म युवा पुनःपुनर्नं कृतं किन्तु मेयति चिन्तयन् ॥

अत्र कुचयोरतिगौररूपेणाऽभिभूतं कुङ्कुमं न ज्ञायते । अत एव युवा पुनःपुनर्विलेपनं कुङ्कुमस्य करोतीति वर्णनाद्भवति मीलितालङ्कारः ॥

**सादृश्याभिभवे स्फूर्तौ हेतुनोन्मीलितं मतम् ॥ २९ ॥**

सादृश्येन सदृशधर्मेणाऽभिभवे कृते सति वस्तुनः पुनः केनचिद्धेतुना स्फूर्तौ जातायां सत्यामुन्मीलितालङ्कारः । यथा कल्पलतायाम्—

इतः सरोजेषु सितेषु संस्थितो न लक्ष्यते हंसगणः समन्ततः ।
कदाचिदायाति विभेदमप्यसौ पतद्भिरेकप्रचलत्पतत्रकैः ॥

अत्र सितपद्मवर्तिश्वेततारूपसादृश्येन हंसगणस्याऽभिभवे भेदाज्ञाने कृते सति भवत्युन्मीलितालङ्कारः ॥

**अनुमानं च कार्यादेः कारणाद्यवधारणम् ।**

कार्यादिरूपेण हेतुना यत्र कारणादीनामवधारणं ज्ञानं भवति तत्राऽनुमानालङ्कारः । यथा माधवचम्पूग्रन्थे—

सहसा हृदये निधाय चेतो नयनादीन्द्रियमुद्रणां विधाय ।
अयि कण्टकिताङ्गयष्टि ! सत्यं कथय ध्यायसि किं रहोनिषण्णा ॥

अत्र नयनमुद्रणादिरूपध्यानकार्येण हेतुना किञ्चिद्विषयकध्यानज्ञानं जातमिति विशिष्य पृच्छति 'किं ध्यायसी'त्यनेनेति भवत्यत्राऽनुमानालङ्कारः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

**अर्थापत्तिः स्वयं सिद्धयेत्पदार्थान्तरवर्णनात् ॥२३॥**

एकपदार्थवर्णनाद्यन्यः पदार्थः स्वयं सिद्धयेत्तदाऽर्थापत्त्यलङ्कारः । यथा तत्रैव—

एतस्मिन्मुसलायुधे रणभुवो मूर्धानमारोहति
मोघद्वास्वरमण्डलो दिनमणिः खद्योतपोतायते ।
शक्रः पृष्ठगकातरेत्तयागर्वैरस्याऽऽस्यमालोकयन्
धावन्मूर्च्छति सङ्गराचव पतिः कोऽयं पतङ्गाकृतिः ॥

अत्रेन्द्रादीनामेवंविधदशारूपैकपदार्थवर्णनादेव बलभद्रस्य शौर्यातिशयरूपोऽन्यः पदार्थः स्वयमेव सिद्धयति । तथा हि बलभद्रस्य शौर्यातिशयं विनेन्द्रादीनां तादृशी दशाऽनुपपन्नेति तस्य शौर्यातिशयसिद्धिरिति भाव इतीह भवत्यर्थापत्त्यलङ्कारः ॥

**अलङ्कारः परिकरः साऽभिप्राये विशेषणे ।**

विशेषणे साभिप्राये सति परिकरालङ्कारः । यथा विद्वन्मोदतरङ्गिण्याम्—

देवानर्चय सञ्चय प्रतिदिनं पुण्यानि जन्मान्तरे
भोगाय प्रयतो महाक्रतुविधौ स्वर्गाय हिंसां कुरु ।
इत्थं वञ्चकवञ्चनोत्पथगता बुद्धिस्त्वदीया चिरा-
दप्रत्यक्षपदार्थसार्थरहितं पन्थानमारोहतु ॥

अत्र चार्वाकस्योक्तौ पन्थानमित्यस्याऽप्रत्यक्षपदार्थसार्थरहितमिति विशेषणे साभिप्रायम् । तथा हि वञ्चकानां याज्ञकादीनां पन्था अप्रत्यक्षस्वर्गादिरूपपदार्थघटित इति हेयः, अप्रत्यक्षस्याऽप्रमाणत्वात् । अस्माकं तु तद्रहितः ॥

**साभिप्राये विशेष्ये तु भवेत्परिकराङ्कुरः ॥ २४ ॥**

यथा—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अपि करिपरिभूतिवीतशक्तिश्चिरजरयाऽपि च जर्जरीकृताङ्गः ।
अपि भवदधिकक्षुधाऽभिभूतः किमु वृणुते मृगनायकस्तृणानि ॥

अत्र मृगनायक इति विशेष्यपदं साभिप्रायम् । तथा हि अपरे मृगास्तृणान्यश्नन्तीति युक्तमेव । अयं तु मृगाणां नायकः कथं तृणान्यश्नीयात्, विना दारितमत्तमातङ्गपिशितानीति भावप्रकाशकमिदं विशेष्यपदमिति भवति परिकराङ्कुरालङ्कारः ॥

स्यात्काव्यलिङ्गं वाक्यार्थे नूतनार्थसमर्थके ।

वाक्यार्थे नूतनार्थसमर्थके कदाप्यजातार्थप्रकाशके सति काव्यलिङ्गमलङ्कारः स्यात् । यथा माधवचम्पूग्रन्थे—

भस्मीभूतः कुसुमविशिखः शम्भुनेत्राग्निनाऽभू-
ज्ज्वालादाधी तदनु मनसि प्राप्तजन्मा बभूव ।
भूयस्तस्मिन् विरहदहनैर्दाहितोऽसौ मयैवं
कुम्भोत्पन्नो व्यथयति पुनर्मामहो तन्न वेद्मि ॥

तत्र विरहदहनेन मदनस्य दाह एव नूतनः कदाऽप्यभूतत्वात्तादृशार्थप्रकाशकोऽत्र वाक्यार्थ इति भवति काव्यलिङ्गालङ्कारः ॥

वाञ्छितार्थाधिकप्राप्तिरयत्नेन प्रहर्षणम् ॥ २५ ॥

यत्र विनैव यत्नं वाञ्छितादर्थादधिकप्राप्तिर्वर्ण्यते तत्र प्रहर्षणालङ्कारः । यथा शृङ्गारतटिन्याम्—

अद्याऽस्ति सा रोषवती सखी मे
निवेदिते द्वारि सखीभिरित्थम् ।
यावद्युवा वाञ्छति दृष्टिमात्र-
मालिङ्गितस्तावदयं युवत्या ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्र दृष्टिमात्रवाञ्छकस्य नायकस्याऽप्रयत्नेनैवाऽऽलिङ्गन-प्राप्तिवर्णनेन भवति प्रहर्षणालङ्कारः ॥

**इष्यमाणविरुद्धार्थसम्प्राप्तिस्तु विषादनम् ।**

इष्यमाणवस्तुनो विरुद्धवस्तुप्राप्तिर्यत्र वर्ण्यते तत्र विषादना-लङ्कारः । यथा कल्पलतायाम्—

गत्वा पिबाम्यति मधूनि समं वधूभि-
रित्थं विचिन्त्य सरसीमलिरेति यावत् ।
केनापि तावदतिमत्तमतङ्गजेन
निर्मूलितानि सहसैव सरोरुहाणि ॥

अत्रेष्यमाणस्य सरसीषु मधुपानस्य विरुद्धं वस्तु मधुस्थान-भूतानां सरोरुहाणामुन्मूलनं तस्य प्राप्तिर्वर्णितेति भवति विषादनालङ्कारः ॥

**सामान्यं यदि सादृश्याद्भेद एव न लक्ष्यते ॥ २६ ॥**

सादृश्यात्समानधर्मवशाद्यदि परस्परं वस्तूनां भेद एव न ज्ञायते तर्हि समान्यालङ्कारः । यथा कल्पलतायाम्—

उद्यत्पलाशकुसुमैरमितैः समन्ता-
च्छोणीकृतासु सकलासु दिशासु सद्यः ।
नाऽबोधि कामुकजनैरभिसारिणीभिः
शोणायितापि पुरुहूतदिशा निशान्ते ॥

अत्र सादृश्यात् किंशुककृतसकलदिक्छोणस्वरूपधर्माद् निशान्तकालीनाऽरुणोदयकृतारक्तप्राचीदिशाया इतरदिगपेक्षया भेदो न लक्ष्यते इति भवति सामान्यालङ्कारः । मीलिते तु सदृशधर्मेणाऽभिभूतस्य पदार्थस्य ज्ञानमेव न जायते, इह तु सदृश-धर्मवशात् परस्परं भेदमात्रं न ज्ञायते पदार्थस्तु ज्ञायत एवेति मीलितात्सामान्ये विशेषः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अतिशयोक्तिश्चतुर्विधा— अक्रमातिशयोक्त्यन्तातिशयोक्ति-भेदकातिशयोक्तिरूपकातिशयोक्तय इति । तासां क्रमेण लक्षणो-दाहरणानि—

**अक्रमातिशयोक्तिश्चेद्युगपत्कार्यकारणे ।**

युगपदेकदैव यदि कार्यकारणयोरुत्पत्तिर्वर्ण्यते तर्हि अक्रमा-तिशयोक्त्यलङ्कारः । यथा—

त्वदरातिमहीपालभवने भुवनेश्वर ! ।
तव क्रोधेन दारिद्र्यं सहैव समुपस्थितम् ॥

अत्र दारिद्र्यरूपकार्यस्य कारणं-नृपक्रोधः। युक्तं तु कारण-स्य पूर्वभावः परभावः कार्यस्य । इह तु तयोरेककालमेवोत्पत्ति-वर्णनाद्भवत्यक्रमातिशयोक्तिरलङ्कारः ॥

**अत्यन्तातिशयोक्तिस्तु पौर्वापर्यव्यतिक्रमे ॥ २७ ॥**

कार्यकारणयोः पौर्वापर्यव्यतिक्रमे सति कार्योत्पत्त्यनन्तरं कारणोत्पत्तौ वर्णितायां सत्यामत्यन्तातिशयोक्त्यलङ्कारः । यथा शृङ्गारतटिन्याम्—

मम तु मानमयी मतिरादितो गलवती बत तच्चनुवीक्षणात् ।
अनुनयं कृतवानथ पादयोः सखि ! पतन् पतिरेष पुनःपुनः ॥

अत्र कार्यस्य मानभङ्गस्य प्रसिद्धकारणादनुनयात् पूर्वमेवो-त्पत्तिर्वर्णितेति भवत्यत्यन्तातिशयोक्त्यलङ्कारः ॥

**भेदकातिशयोक्तिः स्यात् स्वभेदश्चेत्स्वजातिषु ।**

यदि स्वजातिष्वेव स्वभेदो वर्ण्यते तदा भेदकातिशयोक्त्य-लङ्कारः । यथा तत्रैव—

धन्येयमन्यैव विलासिनीनां लीलाविलासप्रभवाय रीतिः ।
असारसंसारविचारिणोऽपि यथा किल व्याकुलतां भजन्ति ॥



CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्र सकलरीतीनां मध्ये नितम्बिनीनां रीतिरन्यैवेत्युक्त्वा स्वजातिमध्य एव स्वभेदः कृत इति भवति भेदकातिशयोक्त्यलङ्कारः ॥

रूपकातिशयोक्तिः स्याद्रूपकाद्रूप्यनिर्णये ॥ २८ ॥

सादृश्यवशाद् यस्याभेदोऽन्यत्राऽऽरोप्यते तद्रूपकम् । यस्मिन्नन्यस्याऽभेद आरोप्यते तद्रूप्यम् । तथा च यत्र रूप्यस्योल्लेखो नास्ति केवलं रूपककथनादेव रूप्यमुन्नीयते तत्र रूपकातिशयोक्त्यलङ्कारः । यथा भागवतचम्पूग्रन्थे—

भुजङ्गदयिताश्रिता लसदनेकपुष्पान्विता
द्विरेफततिसेविता प्रमदखञ्जनालङ्कृता ।
फलद्वयभरानता विलसिता नवैः पल्लवै-
र्विलोचनपथं गता भवति कापि हैमी लता ॥

अत्र हेमलतास्वरूपस्य रूपकस्यैवोल्लेखेन कामिनीस्वरूपं रूप्यमुन्नीयते, न तु कामिन्याः पृथगुल्लेखोऽप्यस्ति । एवं भुजगदयितोल्लेखेन वेणी, पुष्पोल्लेखेन दन्तपङ्क्तिः, द्विरेफतत्युल्लेखेन लोमावली, खञ्जनोल्लेखेन नयने, फलद्वयोल्लेखेन कुचौ, पल्लवोल्लेखेन करचरणाऽधरा इति भवति रूपकातिशयोक्त्यलङ्कारः ॥

प्रौढोक्तिस्तदशक्तस्य तच्छक्तत्वावकल्पनम् ।

तत्कर्मण्यशक्तस्यापि असमर्थस्यापि तत्कर्मणि शक्तत्वावकल्पनं समर्थत्वकल्पनं यत्र क्रियते तत्र प्रौढोक्त्यलङ्कारः । यथा—

दिशो दशदानूर्ध्वं युगपदधिरुह्य प्रचलिता
समेत्य ब्रह्माण्डं प्रसरितवती सिंहनृपतेः ।
दलत्तारापुष्पस्फुरदमृतधामैकफलिनी
जगत्पूर्त्यै कीर्तिः कलयति लतामूर्तिमभितः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्र मूर्तिग्रहणासमर्थाया अपि कीर्तेर्लतामूर्तिग्रहणवर्णनेन भवति प्रौढोक्त्यलङ्कारः ॥

**वर्ण्यानां तुल्यधर्मत्वे कथिता तुल्ययोगिता ॥२९॥**

वर्ण्यानां वस्तूनां तुल्यधर्मत्वे सति समानधर्मत्वे सति तुल्ययोगितालङ्कारः । यथा—

अस्तं याते दिवानाथे निशानाथे महोदयम् ।
उन्मीलन्ति कुमुद्वन्ति चकोरीनयनानि च ॥

अत्र वर्ण्यानां कुमुद्वतीनां चकोरीनयनानां चोन्मीलनरूपसमानधर्मत्ववर्णनाद्भवति तुल्ययोगितालङ्कारः ॥

**सम्भावनं यदीत्थं स्यादित्यूहे सति जायते ।**

यदि इत्थं स्यात्तर्हि इदं स्यादित्यूहे सति वितर्के सति सम्भावनालङ्कारो जायते । यथा—

अर्द्धाङ्गीकृतपूर्वकीर्तिवनितादीव्यत्सितांशुप्रभं
कैलासीकृतदिक्करीन्द्रशिरसि न्यस्तस्वपादाम्बुजम् ।
विश्वव्याप्यविनाशि शङ्करपदं यायात्त्वदीयं यशो
न स्याच्चेद्यशवन्तसिंहनृपते ! त्वद्दानपानीयजम् ॥

अत्र यदि त्वद्दानपानीयजं यशो न स्यात्तर्हि शङ्करपदं यायादिति तर्कः कृत इति भवति संभावनालङ्कारः ॥

**अवर्ण्यानां च वर्ण्यानां धर्मैक्ये सति दीपकम् ॥३०॥**

अवर्ण्यानां प्रकृतवर्णने मुख्यत्वेनाऽनुद्देश्यानां प्रकृतवर्णने मुख्यत्वेनोद्देश्यानां पदार्थानां धर्मैक्ये सति दीपकालङ्कारः । यथा कल्पलतायाम्—

इन्दुः कान्त्या यतिः शान्त्या नीत्या च वसुधाधिपः ।
रीत्या काव्यं वधूर्धृत्या कुरुते जनरञ्जनम् ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्र चन्द्रादीनामवर्ण्यानां वर्ण्यस्य च राज्ञो जनरञ्जनरूपधर्मैक्येन भवति दीपकालङ्कारः ॥

आवृत्ते दीपकपदे भवेदावृत्तिदीपकम् ।

दीपकपदे वर्ण्याऽवर्ण्ययोर्धर्मैक्यबोधकपदे आवृत्ते सत्यावृत्तिदीपकालङ्कारो भवति । आवृत्तिः पुनःपुनःकथनम् । यथा—

सुधांशुर्भाति यामिन्या कामिन्या भाति कामुकः ।
लतया भूरुहो भाति भूसुरो भाति विद्यया ॥

अत्र वर्ण्यस्य भूसुरस्य ब्राह्मणस्याऽवर्ण्यस्य च चन्द्रादेर्धर्मैक्यबोधकस्य भातीतिपदस्याऽऽवृत्तिरस्तीति भवत्यावृत्तिदीपकालङ्कारः ॥

पृथगुद्दिष्टसामान्ये प्रतिवस्तूपमा मता ॥३१॥

सामान्ये समानधर्मे पृथगुद्दिष्टे सति भिन्नपदेन कथिते सति प्रतिवस्तुनि प्रतिपदार्थे उपमासत्त्वे च प्रतिवस्तूपमालङ्कारो भवति । यथा—

विलीनतामेव गता दरिद्रता
महीश ! दानाय भवत्करोदये ।
अदृश्यतामेव भजन्ति कौशिकाः
समन्ततो भानुमतः करोदये ॥

अत्र दरिद्रताया उलूकानां चाऽदृश्यत्वप्राप्तिरूपसमानधर्मो दरिद्रता विलीनतां गता, कौशिका अदृश्यतां भजन्तीति पृथक्पदेनोक्तः । अस्ति च प्रतिपदार्थमेवोपमा । तथा हि राज्ञो भानुमता, दरिद्रतायाः कौशिकैः, करस्य किरणैरिति भवति प्रतिवस्तूपमालङ्कारः ॥

चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तालङ्कृतिस्तदा ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यदि बिम्बप्रतिबिम्बत्वं भवति तदा दृष्टान्तालङ्कारः । अयं भावः—यथा बिम्बप्रतिबिम्बयोर्वास्तवमुखदर्पणागतमुखयोः परस्परमेकैव छाया दृश्यते, तथा यत्र पदार्थयोः परस्परमेकैव छाया भासते तत्राऽयमलङ्कारः । यथा—

अनर्गलपरिस्फुरन्मधुरदिव्यकाव्यंवदं
हठोद्धृतपदद्वयस्फुरितधीरपि स्पर्धते ।
दिनैः कतिपयैरितः कथयितैव दिल्लीपतेः
पदं तृणमिति स्फुटं मनसि भिल्लपल्लीपतिः ॥

अत्र तादृशकाव्यंवदमपि हठोद्धृतपदद्वयस्फुरितधीः कुकविरपि स्पर्द्धते इत्येकः पदार्थः । इतः कतिपयैर्दिनैर्दिल्लीपतेरपि पदं तृणमिति मनसि भिल्लपल्लीपतिः कथयितैवेत्यपरः पदार्थः । अनयोस्तु बिम्बप्रतिबिम्बभावः स्फुट एव । तथा हि यथा तादृशकाव्यंवदकविस्पर्द्धापदद्वयकथककुकवेरुपहासायैव तथा दिल्लीपतेः पदं तृणमिति भिल्लपल्लीपतेरपि कथनमुपहासायैवेति । एवं यथैतत्कथनं तथा कुकविस्पर्द्धा इति परस्परबिम्बप्रतिबिम्बत्वदेकैव च्छाया भासते इति भवत्यत्र दृष्टान्तालङ्कारः । नन्वत्र प्रतिवस्तूपमालङ्कारः किं न स्यादिति चेन्न, पल्लीपतेः कथनरूपो धर्मः कुकवेः स्पर्द्धाकरणरूपो धर्म इति धर्मभेदात् । प्रतिवस्तूपमा तु धर्मैक्ये इति ॥

**वाक्यार्थयोः सदृशयोरैक्यारोपे निदर्शना ॥३१॥**

सदृशयोर्वाक्यार्थयोर्यत्रद्वयामैक्यारोपे कृते सति निदर्शनालङ्कारः । यथा शृङ्गारलतिकायाम्—

योऽभितो वसतो नाथ ! भवतः समुपागमः ।
मदीयभवने सोऽयमिन्दोरमृतनिर्झरः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्र सुखदत्वेनाऽसम्भावितत्वेन च सदृशयोर्नायकागमेन्दुसम्बन्ध्यमृतनिर्झरयोर्यत्तत्पदैनैक्यारोपः कृत इति भवति निदर्शनालङ्कारः । असम्भावितत्वं तु स्फुटमेव । तथा हि—अभितो वसतः कान्तान्तरासङ्गिनो नायकस्य समयाभावादेवागमाभावः । एवं देवतामात्रभोग्यत्वेनाऽमृतस्य निर्झराभावोऽपीति ॥

**व्यतिरेको विशेषश्चेदुपमानोपमेययोः ।**

उपमानोपमेययोः कश्चिद्विशेषश्चेत्कीर्त्यते तर्हि व्यतिरेकालङ्कारो भवति । यथा—

सुधेव वसुधा सत्यमानन्दयति मानसम् ।
महान्तमपि किं त्वेषा संमोहयति सन्ततम् ॥

अत्रोपमानभूतसुधात उपमेयभूतवसुधायाः संमोहकत्वेनैव विशेष इति भवति व्यतिरेकालङ्कारः ॥

**सहोक्तिः सहभावश्चेद्भासते जनरञ्जकः ॥२१॥**

यदि जनरञ्जकः सहभावः सहवर्तिता भासते तर्हि सहोक्त्यलङ्कारः । यथा—

अतिचित्रमिदं भुवने प्रतिपादितमेवमहो जगतीपतिना
विचरन्नपि यन्नियतं सहितो भवदीयप्रतापदिवापतिना ।
यशवन्त ! नवक्षितिनायक ! तावकदानपयोनिधितः सहसा
जनिमेत्य यशोहिमदीधितिरेष जगद्धवलीकुरुते महसा ॥

अत्र प्रतापदिवापतेर्यशोहिमदीधितेश्च सहभावो जनरञ्जको भवत्येवेति सहोक्त्यलङ्कारः । ननु भवदीयप्रतापदिवापतिनेत्यत्र संयुक्तस्य प्रेत्यक्षरस्य पूर्वो यकारो गुरुरेवेति छन्दोभङ्ग इति चेन्न, रेफसंयुक्ताक्षराऽऽद्यक्षरं विकल्पेन गुरु भवतीत्यतः पाठकाले लघुतयोच्चारणीयो यकार इत्यदोषात् । अत्र च

CC-0. Sampurnanand University Collection. Digitized by eGangotri

जनरञ्जक इति विशेषणात् 'सहैव दशभिः पुत्रैर्भारं वहति गर्दभी' इत्यादौ न सहोक्त्यलङ्कारः ॥

विनोक्तिश्चेद्विना किञ्चित्प्रस्तुतं हीनमुच्यते ।

यत्र किञ्चिद्वस्तु विना प्रस्तुतं वस्तु हीनमपकृष्टमुच्यते तत्र विनोक्त्यलङ्कारः । यथा—

अमन्दपुण्यसन्दोहसम्पादितमनिन्दितम् ।
वृथा जन्मभृतां जन्म विना सुकृतसञ्चयम् ॥

अत्र सुकृतसञ्चयरूपकिञ्चिद्वस्तु विना प्रस्तुतं जन्मभृतां तादृगपि जन्माऽपकृष्टमुक्तमिति भवति विनोक्त्यलङ्कारः ॥

समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चेत् ॥१४॥

यदि कस्मिंश्चिदर्थे प्रस्तुते वर्णिते सति अप्रस्तुतस्याऽन्यपदार्थस्य परिस्फूर्तिर्भवति तदा समासोक्त्यलङ्कारः । यथा कल्पलतायाम् —

मयि मुकुलितमालतीलतायां स्थितवति यानि दिनानि सङ्गतानि ।
अहह ! विधिविधानतोऽधुनैवं कथमपि तानि पुनर्न वीक्षितानि ॥

अत्र सखीनां मध्ये परस्परं मालतीगुणवर्णनकाले केनचिद्विरहिणा कृते प्रस्तुतमालतीलतावस्थानवर्णनेऽप्रस्तुतस्याऽभिनवकामिनीसङ्गमस्य मुकुलितेत्यादिपदमहिम्नेव परिस्फूर्तिर्भवत्येवेति भवति समासोक्त्यलङ्कारः ॥

श्लेषः पदे चेन्नानार्थप्रतीतिः सप्रयोजना ।

यत्र पदे किञ्चित्प्रयोजनवशान्नानार्थप्रतीतिर्भवति तत्र श्लेषालङ्कारः । यथा कल्पलतायाम्—

त्रातारो भूभृतां ते प्रबलतरसुरत्राणसन्त्रासभाजां
यस्य प्रौढप्रतापज्वलनकवलिता नायका वाहिनीनाम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

धाराभिर्दानाबारामुदितनिजमनःसत्प्रसादोचिताभिः
पूर्णात्वं प्राप्य तूर्णं सकलबलभृतां दुस्तरत्वं भजन्ति ॥

अत्र भूभृच्छब्देन राजनः पर्वताश्च, सुरत्राणशब्देन यवनक्षितीश इन्द्रश्च, कवलितशब्देन ग्रस्ताः शोषिताश्च, नायकशब्देनाऽधिपतयो भर्तारश्च, वाहिनीशब्देन सेना नद्यश्च, दुस्तरत्वशब्देनाऽयोध्यत्वमलङ्घ्यत्वं च कथितमिति सम्प्रयोजनैव एकैकपदस्य नानार्थतेति भवतीह श्लेषालङ्कारः ॥

अप्रस्तुतप्रशंसा स्यात्सा यत्र प्रस्तुतानुगा ॥ १५ ॥

यत्र साऽप्रस्तुतस्याऽप्रकृतवर्ण्यस्य प्रशंसा स्तुतिः प्रस्तुतानुगा भवति प्रस्तुते प्रकृतवक्तव्य एव पर्यवस्यति, तेनाऽप्रस्तुतप्रशंसालङ्कारः । यथा—

स्वर्णाब्जस्फुटमानमानससरःसम्भूतिराविर्भव—
द्वीर्वाणादरसारपूरिततया संशोभितस्वर्धुनिः ।
दुर्मानैरवमानितो यदि पुनर्ग्रामीणादीनान्वयैः
किं हीनः परिशंस्यते स जगतां हंसः प्रशंसास्पदम् ॥

अत्राऽप्रस्तुतेदृशहंसस्येयं प्रशंसा स्तुतिः कस्मिंश्चिदनाभिज्ञैरवमानिते महापुरुषे पर्यवस्यतीति भवत्यप्रस्तुतप्रशंसालङ्कारः ॥

स्यात्सामान्यविशेषोक्तावलङ्कारः स एव हि ।

सामान्ये वक्तव्ये विशेषोक्तौ सत्यां स एव सामान्यविशेष एवाऽलङ्कारः । यथा—

धिगहो ! कामिपुरुषानलं परुषकर्मिणः ।
जीवितान्यपि मुञ्चान्ति यदमी कामिनीकृते ॥

अत्र कामिनः कामिनीकृते सर्वमेव त्यजन्तीति सामान्ये वक्तव्ये जीवितत्यागरूपविशेषोक्तिः कृतेति भवति सामान्यविशेषालङ्कारः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भवेदर्थान्तरन्यासोऽनुषक्तार्थान्तराभिधा ॥ ३६ ॥

यत्र मुख्येनाऽर्थेनाऽनुषक्तं सहितं मुख्यार्थस्यैव परिपोषकतयाऽर्थान्तरं पदार्थान्तरमुच्यते तत्राऽर्थान्तरन्यासालङ्कारः । यथा—

स रावणो दैवतयूथरावणो विदेहभूमीपतिनन्दिनीकृते ।
जगाम रामस्य शरैर्यमालयं न कामिनां किञ्चिदपीह दुष्करम् ॥

अत्र कामिनां न किञ्चिदपि दुष्करमिति मुख्येनाऽर्थेन सहितं रावणस्य यमालयगमनरूपं मुख्यार्थस्यैव परिपोषकमर्थान्तरमुक्तमिति भवत्यर्थान्तरन्यासालङ्कारः ॥

फलेन प्रकटीभूते पर्यायोक्तिस्तु कारणे ।

कारणे फलेनैव प्रकटीभूते सति पर्यायोक्त्यलङ्कारः । यथा कल्पलतायाम्—

निजाश्रुभिः पूरितभूप्रदेशाः पिपासया पीतपयःप्रवाहाः ।
वनीवनीभूतदरीगिरीणामरिप्रियाः प्राणप्रिया श्रयन्ति ॥

अत्राऽरिप्रियाणां गिरीदरीश्रयणरूपफलेनैव शत्रूच्छेदरूपं कारणं प्रकटीभवतीति भवति पर्यायोक्त्यलङ्कारः ॥

स्तुतिव्याजेन निन्दायां स्तुतिनिन्दाऽभिधीयते ॥ ३७ ॥

स्तुतिव्याजेन निन्दायां कृतायां सत्यां स्तुतिनिन्दालङ्कारः । यथा—

धन्या धन्या क्षात्रवृत्तिस्तवेयं धन्या धन्या चेदृशी धर्मबुद्धिः ।
मातुः कण्ठच्छेदिनी यातु राम! प्रादुर्भूता गर्भिणीगर्भपाते ॥

अत्र परशुरामस्य क्षात्रवृत्तौ धर्मबुद्धौ च धन्यत्वोत्कीर्तनेन कृताऽपि स्तुतिर्निन्दैवाऽत्यन्ताधर्महेतुमातृकण्ठच्छेदगर्भिणीगर्भपातकर्तृत्वादितीह भवति स्तुतिनिन्दालङ्कारः ॥



CC-0. Sampurnanand University Collection. Digitized by eGangotri

निन्दास्तुतिरलङ्कारो निन्दाव्याजेन चेत्स्तुतिः ।

निन्दाव्याजेन यत्र स्तुतिः क्रियते तत्र निन्दास्तुतिरलङ्कारः । यथा—

वाराणसि ! वृथैव त्वामाश्रयन्ति महाजनाः ।
भवभोगपरित्यक्तं यत्करोषि दिगम्बरम् ॥

अत्र भवभोगपरित्यागपूर्वकदिगम्बरत्वकारिणीं वाराणसीं महाजना वृथा भजन्तीत्यनेन कृतापि निन्दा स्तुतिरूपैव । तथा हि—इयं खलु सांसारिकभोगविरतं दिगम्बरं सदाशिवरूपं करोतीति भवतीह निन्दास्तुतिरलङ्कारः ॥

आक्षेपस्तु प्रयुक्तस्य प्रतिषेधो विचारणात् ॥३८॥

प्रथमतः प्रयुक्तस्य वस्तुनः पुनर्विचारणाद्यत्र निषेधः क्रियते तत्राऽऽक्षेपालङ्कारः । यथा—

आलोकितुं याहि सरः सरसं खञ्जनद्वयम् ।
अथवाऽऽलोकयाऽत्रैव कान्ताया नयनद्वयम् ॥

अत्र खञ्जनमालोकितुं सरो याहीति प्रथमतः प्रयुक्तम् । अथ विचारेण कान्ताया नयनद्वयमालोकयेत्यनुज्ञया तस्य निषेधः कृत इति भवत्याक्षेपालङ्कारः ॥

विरोधोऽनुपपत्तिश्चेद् गुणद्रव्यक्रियादिषु ।

गुणद्रव्यक्रियादिषु यद्यनुपपत्तिर्वर्ण्यते तदा विरोधालङ्कारः । यथा—

स कीदृशः शीतकरो यो मां दहति सन्ततम् ।
स च कालः कथं क्रूरो यो मे शरणतां गतः ॥

अत्र दाहकरस्य शीतकरत्वमनुपपन्नम् । एवं शरणतां गतस्य यमस्य क्रूरत्वमप्यनुपपन्नमिति वर्णनाद्भवति विरोधालङ्कारः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

**श्लेषादिभिर्विरोधश्चेद्विरोधाभास उच्यते ॥ ३६ ॥**

यदि वस्तुतो विरोधो नास्ति श्लेषमात्रेणैव विरोधो भासते तदा विरोधाभासालङ्कारः । यथा—

शिवोऽपि न शिवाप्रभुः स मदनोऽपि नो मन्मथः
कलानिधितया स्फुरन्नपि सदा न दोषाकरः ।
भवन्नपि पतिः श्रियो न च जनार्दनत्वं गत-
स्तदद्भुतगुणोत्तरो हृदयभूपतिर्भासते ॥

अत्र श्लेषेण विरोधो भासते । तथा हि—यः शिवो महादेवः स तु शिवायाः पार्वत्याः प्रभुर्भवत्येव, अयं पुनर्भूपतिः शिवोऽपि सन् शिवाप्रभुर्नेति विरोधः । वस्तुतो विरोधो नास्ति । तथा च शिवोऽपि कल्याणस्वरूपोऽप्ययं शिवाय कल्याणायाऽप्रभुर्वाऽसमर्थो न । तथा चाऽयं भावः—अन्ये बहवः स्वयमेव कल्याणरूपाः परकल्याणकरणेऽसमर्थाः, अयं तु स्वयमपि कल्याणरूपः परकल्याणकरणे च समर्थ इति । एवमग्रेऽपि बोध्यमिति भवति विरोधाभासालङ्कारः ॥

**असम्भवोऽर्थनिष्पत्तावसम्भाव्यस्ववर्णनम् ।**

अर्थस्य पदार्थस्य निष्पत्तौ सिद्धौ सत्यां यत्राऽसम्भाव्यत्ववर्णनम्—इदमसम्भवं वस्तु जातमिति वर्णनं क्रियते तत्राऽसम्भवालङ्कारः । यथा माधवचम्पूग्रन्थे—

बाणेन येन निहतो भाले महिषसत्तमः ।
पश्य दैवस्य माहात्म्यं तेनैवाऽस्य हयो हतः ॥

अत्र हयहननरूपकार्यनिष्पत्तौ सत्यामसंभाव्यत्वं वर्ण्यते । तथा हि—अहो येन बाणेन संमुखमागतस्य महिषस्य हननं कृतं तेनैव स्ववाहस्याऽपि हननमित्यहयाऽत्यन्तासंभावितत्वं 'पश्य

दैवस्य माहात्म्य’मित्यनेनोक्तमिति भवत्यसम्भवालङ्कारः । श्लोक-तात्पर्यं तु भाले बाणे लग्ने सति संमुखमागच्छन्महिषः सत्वरं विमुखीभूतः । अथ तत्पुच्छभागेन निःसृतो महायवीयान् बाणो हयशिरसि लग्न इति ॥

विशेषोक्तिरनुत्पत्तिः कार्यस्य सति कारणे ॥४०॥

कारणेऽपि याते सति कार्यस्योत्पत्तिर्यत्र न वर्ण्यते तत्र विशेषोक्त्यलङ्कारः । यथा—

दुर्जनैरपि कृते दुरुत्तरे नैव कोपमुपयन्ति सज्जनाः ।
कोपमप्युपगताः कदापि चेन्नाऽपकृद्विधिविधानकारिणः ॥

अत्र दुरुत्तररूपकारणे जातेऽपि-कोपरूपकार्याभावः । एवं कोपरूपकारणे जातेऽप्यपकाराभावस्तु नियत एवेति भवति विशेषोक्त्यलङ्कारः ॥

विभावना विनाऽपि स्यात्कारणं कार्यजन्म चेत् ।

यदि कारणं विनाऽपि कार्यजन्म भवति तदा विभावना-लङ्कारः । यथा माधवचम्पूग्रन्थे—

प्रचलति सति यस्मिन् कौतुकेनाऽपि भूमौ
भवति सुरसमाजो व्याकुलः सुन्दरीभिः ।
दशशतशतरक्षो नायकानामधीशो
भवति न हि गरीयान् स स्वतः किं बलीयान् ॥

अत्र स्वर्लोकगमनोद्यमरूपकारणं विना सुरसमाजवैकल्य-रूपकार्योदयाद्भवति विभावनालङ्कारः ॥

अख्यातभिन्नदेशित्वे कार्यहेत्वोरसङ्गतिः ॥४१॥

कार्यकारणयोरख्यातमप्रसिद्धं यद्भिन्नदेशित्वं भिन्नस्थान-स्थितत्वं तस्मिन् सत्यसङ्गतिरलङ्कारः । यथा—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

उपकारिमुखेन्दुस्थमन्यदेव वचोऽमृतम् ।
क्वचित्स्रवति कस्याऽपि जायते जीवितोदयः ॥

अत्राऽमृतस्रवणरूपकारणजीवितोदयरूपकार्ययोः प्रसिद्धं त्वेकदेशित्वमेव, यत्रैवाऽमृतं स्रवति तस्यैव जीवितोदयदर्शनात् । इदं तु उपकारिमुखेन्दुस्थममृतं क्वचित् स्रवति कस्यचिज्जीवितोदयो भवतीत्यप्रसिद्धमेव भिन्नदेशित्वमुक्तमिति भवत्यसङ्गतिरलङ्कारः । प्रख्यातपदोपदानात्तु—

उदयाचलचूडाग्रमालम्बति दिवाकरे ।
सहसैव प्रकाशन्ते दर्योऽपि च गिरेरिमाः ॥

इत्यत्रोदयाचलचूडाग्रीयदिवाकरसम्बन्धकारणगिरिप्रकाशरूपकार्ययोः प्रसिद्धमेव भिन्नदेशित्वमिति न भवत्यसङ्गतिरलङ्कारः ॥

विषमं यद्यनौचित्यमन्योन्यान्वयकल्पने ।

अन्योन्यस्य परस्परस्याऽन्वयकल्पने सम्बन्धकल्पने यद्यनौचित्यमनुचितत्वं वर्ण्यते तर्हि विषमालङ्कारः । यथा—

क्वैतच्चे नवतारुण्यं क्व कान्तविरहोऽप्ययम् ।
सैवाऽविवेकिता धातुरिह हेतुरहेतुकी ॥

अत्र तारुण्यकान्तविरहयोः सम्बन्धकल्पने क्वपदयोः प्रयोगेणैवाऽनुचितत्वं दर्शितमिति भवति विषमालङ्कारः ॥

अन्योन्यं वस्तुसम्बन्धे सममौचित्यवर्णने ॥४२॥

परस्परं वस्तूनां सम्बन्धे उचितत्ववर्णने कृते सति समालङ्कारः । यथा—

उचितं यत्कृतं दन्ते तृणं भवदरातिभिः ।
ईदृशेषु विधानेषु तृणमेवाऽमृतायते ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्र तृणदन्तयोः सम्बन्धे उचितत्ववर्णनाद्भवति समालङ्कारः ॥

विचित्रं चेत्प्रयत्नः स्याद्विपरीतफलप्रदः ।

यदि प्रयत्नः कश्चित् किञ्चिद्विपरीतफलजनकः स्यात्तर्हि विचित्रालङ्कारः । यथा—

रतिरन्यैव धन्येयं विधिना विधिनोदिता ।
कायक्लेशेन सौख्यानि लभन्ते यत्तपस्विनः ॥

अत्र दुःखरूपफलजनकः कायक्लेशरूपो यत्नः, स तु विपरीतं सुखरूपफलं जनयतीति भवति विचित्रालङ्कारः ॥

अधिकं त्वधिकाधारादाधेयाधिक्यवर्णने ॥ ४१ ॥

अन्येभ्योऽधिकादप्याधारादाधेये आधिक्यवर्णने कृते सत्यधिकालङ्कारः । यथा कल्पलतायाम्—

अस्ति ब्रह्माण्डभाण्डं हि यस्मिल्लोकाश्चतुर्दश ।
तस्मिन्नपि न ते माति कीर्तिर्जगति कीर्तित ! ॥

अत्र चतुर्दशलोकाश्रयत्वेनेतरापेक्षयाऽधिकेऽपि ब्रह्माण्डे कीर्तिर्न मातीत्यनेनाऽऽधारीभूतब्रह्माण्डादाधेयीभूतकीर्तेराधिक्यं स्फुटमेवोक्तमिति भवत्यधिकालङ्कारः ॥

अन्योन्यं तत्र यत्र स्यादुपकारः परस्परम् ।

यत्र परस्परमुपकारो भवेत्तत्राऽन्योन्यालङ्कारः । यथा—

विनयैर्भाति विद्येयं विनयो भाति विद्यया ।
धनैराभान्ति दानानि दानैर्भान्ति धनान्यपि ॥

अत्र विद्याविनययोर्धनदानयोश्च परस्परमुपकारवर्णनेन भवत्यन्योन्यालङ्कारः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विशेषः ख्यातमाधारं विनाऽप्याधेयवर्णने ॥ ४४ ॥

प्रसिद्धमाधारं विनाऽप्याधेयस्य सत्त्वेन वर्णने कृते सति विशेषालङ्कारः । यथा—

अस्तं गते विजयसिंहमहीमहेन्द्रे
नूनं विभान्ति भुवनेषु गुणास्तदीयाः ।
दूरीकृते मृगमदे चिरमेव पात्रा-
दुज्जृम्भते परिमलो विमलः स कोऽपि ॥

अत्राऽऽधारं राजानं विनाऽपि आधेयानां गुणानां सत्त्वं वर्णितम् । एवं मृगमदं विना परिमलस्येतीह भवति विशेषालङ्कारः ॥

व्याघातोऽन्यक्रियाकारी क्रियामन्यां करोति चेत् ।

अन्यक्रियाकारी पदार्थो यदि तदन्यां क्रियां करोति तदा व्याघातालङ्कारः । यथा कल्पलतायाम्—

विधुरेव जगत्सुशीतलं कुरुते स्वैः किरणैः सुधामयैः ।
मयि पश्य विधेर्विपर्ययं स पदेर्भिर्दहति प्रतिक्षणम् ॥

अत्र शैत्यक्रियाकारिणश्चन्द्रस्य दाहक्रियावर्णनेन भवति व्याघातालङ्कारः ॥

उत्तरोत्तरकार्याणां धारया गुम्फ उच्यते ॥ ४५ ॥

उत्तरोत्तरकार्याणां धारावर्णने कृते सति गुम्फालङ्कारः । यथा—

श्रमेण विद्याऽथ तया विवेकस्तेनाऽपि धीरस्य विमोहभङ्गः ।
उत्पद्यते पूर्वजनिप्रभूतप्रभूतपुण्ये सति सत्समाये ॥

अत्र श्रमेण विद्या, विद्यया विवेको, विवेकेन विमोहभङ्ग उत्पद्यते इति कार्याणां धारावर्णनेन भवति गुम्फालङ्कारः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

गृहीतमुक्तरीत्यर्थश्रेणिरेकावली मता ।

यत्र गृहीतमुक्तरीतीनामर्थानां श्रेणिर्भवति तत्रैकावल्यलङ्कारः। अयं भावः—प्राग्वर्णितयोरर्थयोर्मध्येऽग्रिमपदार्थवर्णनाङ्गतयैकस्य ग्रहणमन्यस्य त्यागः, एवमुत्तरोत्तरं यदि भवति तर्ह्ययमलङ्कार इति । यथा कल्पलतायाम्—

मधूनि पद्मे पिबति द्विरेफः पद्मं विभाति श्रवणे प्रियायाः ।
स्पृशत्यमुष्याः श्रवणं च नेत्रं निर्यान्ति नेत्राच्छरवत्कटाक्षाः ॥

अत्र प्राग्वर्णितयोः पद्मद्विरेफयोर्मध्येऽग्रिमवर्णने द्विरेफत्यागेन पद्मग्रहणं कृतम् । एवं पद्मश्रवणयोर्मध्येऽग्रिमवर्णने पद्मत्यागेन श्रवणग्रहणम् । एवमुत्तरोत्तरमपीति भवत्येकावल्यलङ्कारः ॥

दीपकैकावलीयोगान्मालादीपकमिष्यते ॥ ४६ ॥

पदार्थानां तुल्यधर्मकथनरूपस्य प्रागुक्तस्य दीपकस्यैकावल्याश्च योगात् मालादीपकालङ्कारः । यथा—

अथ श्रयति पुण्येन विवेकं मतिरुद्गता ।
विवेकस्तु ममात्मानमात्मा हरिपदद्वयम् ॥

अत्र मत्यादीनामाश्रयणरूपैकधर्मोक्त्या दीपकमथ च प्राग्वर्णितयोर्मतिविवेकयोर्मध्येऽग्रिमवर्णने मतिपरित्यागेन विवेको गृहीतः, एवमुत्तरोत्तरसत्त्वेनैकावल्यपीत्यनयोरिह योगाद्भवति मालादीपकालङ्कारः । नन्वेवं सत्यन्येषामप्यलङ्काराणां परस्परयोगाद्भवत्वलङ्कारान्तरमिति चेन्न, अत्र प्राक्तनानां विदुषामनुभवानुसारेण पृथक्तया व्यवहारो, नाऽन्यत्राऽपीति ॥

उत्तरोत्तरमुत्कर्षे वर्णिते सार उच्यते ।

उत्तरोत्तरं पूर्वस्मात्पूर्वस्मादुत्कर्षे वर्णिते सति सारालङ्कारः। यथा—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सारा लोकेषु विद्वांसस्तेषु सारा विवेकिनः।
तेष्वनुष्ठानकर्तारस्तेषु कृष्णपदानुगाः॥

अत्रेतरलोकेषु विद्वांसः सारा उत्कृष्टास्तेषु विद्वत्सु विवेकिनः, एवमुत्तरोत्तरमुत्कर्षवर्णनेन सारालङ्कारः॥

क्रमिकाणां क्रमोपात्ते यथासङ्ख्यं क्रमान्वये॥ ४७॥

क्रमिकाणां क्रमेण कथितानां पदार्थानां क्रमोपात्ते क्रमेण कथिते पदार्थे क्रमेणाऽन्वये सति यथासङ्ख्यालङ्कारः। यथा माधवचम्पूग्रन्थे—

कोकानाकुलयंश्चकोरतरुणीवैकल्यमुन्मीलय-
न्नम्भोजानि निमीलयन् कुमुदिनीरुन्मीलयन्सर्वतः।
पान्थानाकुलतां नयन् कुलवधूचेतः समुल्लासय-
न्नस्तं याति दिवापतिः समुदयं यात्येष दोषापतिः॥

अत्र क्रमिकाणां 'कोकानाकुलयंश्चकोरतरुणीवैकल्यमुन्मीलय'न्नित्यादिविशेषणपदार्थानां क्रमोपात्ते दिवापतौ दोषापतौ च विशेष्यपदार्थे क्रमेणाऽन्वयेन भवति यथासङ्ख्यालङ्कारः। नन्वत्र सर्वाण्येव विशेषणान्युभयोरपि विशेष्ययोः सम्भवन्तीति क्व यथासङ्ख्यमिति चेन्न, यतः कोकानामाकुलताप्रयोजकत्वं सूर्यास्ते एव; न चन्द्रोदयेऽपि, चन्द्रस्य दिवोदये तथाऽदर्शनात्, निशायामनुदितेऽपि चन्द्रे तथा दर्शनाच्च। एवं चकोरतरुणीवैकल्योन्मूलकत्वं चन्द्रोदये एव; न सूर्यास्ते, अस्तङ्गतेऽपि सूर्ये चन्द्रानुदये तथाऽदर्शनात्। एवमग्रेऽप्यूह्यम्॥

पर्यायश्चेदनेकस्य स्यादेकेन समन्वयः।

अनेकस्य पदार्थस्य यद्येकेन सह समन्वयो भवति तदा पर्यायालङ्कारः। यथा माधवचम्पूग्रन्थे—

६

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कपोले पाण्डुत्वं किमपि जलधारां नयनयो—
स्तनौ कार्श्यं दैन्यं वचसि हृदि दावानलशिखाम्।
अवज्ञां प्राणेषु प्रकृतिषु विपर्यासमधुना
किमन्यद्वैराग्यं सकलविषयेष्वाकलयते॥

अत्र विरहिणी आकलयते इत्येकस्मिन्नेव पदार्थे कपोले पाण्डुत्वं जलधारां नयनयोरित्याद्यनेकपदार्थानामन्वयेन भवति पर्यायालङ्कारः॥

**परिवृत्तिर्विनिमयश्चेन्न्यूनाधिकयोर्मिथः॥ ४८॥**

न्यूनाधिकयोः पदार्थयोर्यदि मिथः परस्परं विनिमयो वर्ण्यते तदा परिवृत्त्यलङ्कारः। विनिमयस्त्वेकदानेनाऽपरग्रहणम्। अयं भावः—न्यूनवस्तुदानेनाऽधिकवस्तुग्रहणमधिकवस्तुदानेन वा न्यूनवस्तुग्रहणं यदि वर्ण्यते तर्हि भवत्ययमलङ्कारः। यथा कल्पलतायाम्—

प्राणान् प्रदाय युधि मत्तमतङ्गजेभ्यः
क्रीतं यशः किमपि कैरपि वीरधीरैः॥
कैश्चित्पुनर्भुवि निरर्थकजीवितार्थं
विक्रीतमेव सुयशो विदिशि प्रयातैः॥

अत्र पूर्वार्द्धे प्राणरूपन्यूनवस्तुदानेन यशोरूपाधिकवस्तुग्रहणं वर्णितम्। उत्तरार्द्धे तु यशोरूपाधिकवस्तुदानेन जीवितरूपाल्पवस्तुग्रहणं वर्णितमिति भवति परिवृत्त्यलङ्कारः। भवति हि महतां प्राणेभ्योऽपि यशसो गरिष्ठत्वमिति॥

**परिसङ्ख्या निषिद्धार्थनिषेधः श्लेषतोऽन्यतः।**

यत्रैकत्र निषिद्धस्य पदार्थस्याऽन्यत्रापि श्लेषेण निषेधः क्रियते तत्र परिसङ्ख्यालङ्कारः। यथा कल्पलतायाम्—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वृक्षे तादृक्फलं नास्ति पापकेऽस्मिन् कलौ युगे ।
क्लेशाराध्येषु सर्वेषु मन्त्रयन्त्रादिकेष्वपि ॥

अत्र वृक्षे निषिद्धस्य फलस्य श्लेषेण मन्त्रयन्त्रादिकेष्वपि निषेधः कृत इति भवति परिसङ्ख्यालङ्कारः ॥

**वाकाराद्यैर्विकल्पश्चेदलङ्कारः स एव हि ॥ ४६ ॥**

यदि वाशब्दादिना विकल्पः क्रियते तर्हि स एव विकल्प एवाऽलङ्कारः । यथा—

अबन्धो बन्धो वा भवतु भवकारागृहमतु
स्तुतिर्वा निन्दा वा प्रसरतु सतां संसदि सदा ।
सरोजालीशङ्काक्षणमिलदलिव्रातमलिनाः
कटाक्षास्ते साक्षात्कथमपि न यास्यन्ति हृदयात् ॥

अत्राऽबन्धो भवतु बन्धो वा भवतु स्तुतिः प्रसरतु निन्दा वा प्रसरत्विति वाशब्दद्योतितविकल्पकरणाद्भवति विकल्पालङ्कारः ॥

**समाधिः कार्यसौकर्यं कारणान्तरसन्निधेः ।**

यदि कारणान्तरस्य सन्निधानात्कर्तव्यस्य कार्यस्य सौकर्यं सुखेन कर्तुं शक्यता वर्ण्यते तदा समाधिरलङ्कारः । यथा कल्पलतायाम्—

अस्तं यातो दिनमणिरसौ भूषय स्वल्पमङ्गं
तूर्णं तूर्णं रचय कुचयोः केलिपत्राङ्कुरालीम् ।
इत्याकर्ण्य प्रचलितुमियं यावदुत्कण्ठिताऽभू-
त्तावत्प्रीतो जनयति घनाडम्बरं शम्बरारिः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्र सूर्यास्ते कर्तव्यस्याऽभिसाररूपकार्यस्य मेघाडम्बररूपकारणान्तरसन्निधानेन सौकर्यं जातम् । अभिसारो हि घनोदये सुकर एवेति भवति-समाधिरलङ्कारः ॥

भूयसामेकसम्बन्धभाजां गुम्फः समुच्चयः ॥ ५० ॥

यत्रैकसम्बन्धभाजां बहूनां पदार्थानां गुम्फो ग्रथना क्रियते तत्र समुच्चयालङ्कारः ।

निपीय मदिरां दुरोदरवशो वशापङ्क्तिलं
सदाऽत्ति पिशितं हितं न खलु वेद नैवाऽहितम् ।
अयं पतति धावति भ्रमति मूर्छति ध्यायति
मताम्यति पलायते प्रलपति स्फुरत्यश्वति ॥

अत्र इदम्पदवाच्यमध्यमपुरुषसम्बन्धभाजां बहूनां क्रियापदानां ग्रथनया भवति समुच्चयालङ्कारः ॥

प्रत्यनीकं बलवतः शत्रोः पक्षे पराक्रमः ।

यत्र बलवतः शत्रोः पक्षे पक्षीभूते कस्मिंश्चित् पराक्रमो वर्ण्यते तत्र प्रत्यनीकालङ्कारः । अयं भावः—यत्र शत्रुर्बलीयान् स्वयं जेतुमशक्यस्तत्र तत्पक्षाश्रितदुर्बलस्य कस्यचिज्जयः कृत इति वर्णिते भवत्ययमलङ्कार इति । यथा शृङ्गारतटिन्याम्—

अशक्तोऽयं तावत्तव वदनसौन्दर्यविजये
सुधाधामा धावमत्सरप्रसादेत्य सहसा ।
सरोजातं जातु स्फुटतदनुकारीति मतितो
निशायां सायान्हावपि मलिनयत्येव महसा ।

अत्र कान्तामुखसौन्दर्यविजयेऽसमर्थश्चन्द्रः कान्तामुखानुकारितया कान्तामुखपक्षीभूतं सरोजातमेव मलिनयतीति वर्णनाद्भवति प्रत्यनीकालङ्कारः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रतीपमुपमानस्य हीनत्वमुपमेयतः ॥ ५१ ॥

प्रसिद्धोपमेयतो यदि प्रसिद्धोपमानस्य हीनत्वं वर्ण्यते तर्हि प्रतीपालङ्कारः । यथा कल्पलतायाम्—

अयं नृपश्चेदरिवीरहन्ता दानप्रियो लोचनगोचरोऽभूत् ।
कर्णेन किं किं सुरभूरुहेण किं भानुना वाऽपि किमर्जुनेन ॥

अत्र प्रसिद्धोपमानानां कर्णादीनामुपमेयान्नृपात् हीनत्वं वर्णितमिति भवति प्रतीपालङ्कारः । केचित्तु पूर्वोक्तप्रतीपोपमालङ्कारमध्य एव प्रतीपस्यान्तर्भावमिच्छन्ति ॥

उल्लासोऽन्यमहिम्ना चेद्दोषो ह्यन्यत्र वर्ण्यते ।

यद्यन्यस्य कस्याऽपि महिम्ना गुणप्राचुर्येणाऽन्यत्र दोषो वर्ण्यते तर्ह्युल्लासालङ्कारः । यथा—

मधुलिहस्तदभाग्यविजृम्भितं यदि न चम्पककोरकमाश्रयेत् ।
समुदितेऽपि विधौ मलिनी भवेत्कमलिनी यदि तन्निजदुष्कृतम् ॥

अत्र चम्पककोरकगुणमहिम्ना तदनाश्रयणान्मधुलिहोऽभाग्यवर्णनाद्दोषो वर्णितः । एवं विधुकमलिन्योरपीति भवत्युल्लासालङ्कारः ॥

रूपं चेदन्यथाभूतं तथा स्यात्पूर्वरूपता ॥५२॥

कस्यचिद्वस्तुनोऽन्यथाभूतं रूपं नष्टस्वरूपं यदि केनचिद्धेतुना तथा स्यात् पुनस्तादृशमेव पूर्वस्थितं रूपं स्यात्तर्हि पूर्वरूपतालङ्कारः । यथा—

उपेत्य त्रेतातो निजचरणहानिक्रमगतः
समन्ताद्धर्मोऽभूद्धलवति कलावेकचरणः ।
पुरस्तादप्येवं जयिनि जयसिंहक्षितिपतौ
बभूवुश्चत्वारः पुनरभिनवास्तस्य चरणाः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्र कृतयुगे चतुश्चरणस्य धर्मस्य त्रेतायामेकस्य चरणस्य हानिर्द्वापरे द्वितीयस्य कलौ तृतीयस्येति क्रमेणेदानीमेकचरणत्वमापन्नस्य तस्यैव पुनर्जयसिंहक्षितिपतौ जयिनि सति चतुश्चरणत्वरूपपूर्वभावस्य प्राप्तिर्जातेति वर्णनाद्भवति पूर्वरूपतालङ्कारः ॥

तद्गुणः स्वगुणे म्लाने त्वन्यतः स्वगुणोदयः ।

केनचिद्धेतुना स्वगुणे म्लाने सत्यन्यतः पुनः स्वगुणोदयो यदि भवति तर्हि तद्गुणालङ्कारः । यथा कल्पलतायाम्—

तव प्रतापानलदाहितानि चिरं विरूपाण्यरिमन्दिराणि ।
अथो कृपादृष्टिसुधामृतैकवृष्ट्या लब्धस्वरूपाणि निरीक्षितानि ॥

अत्र प्रतापानलदाहेन विरूपतां प्राप्तानामरिमन्दिराणां पुनः कृपादृष्टिवृष्ट्या पूर्वस्वरूपलाभो जात इति वर्णनाद्भवति तद्गुणालङ्कारः । पूर्वरूपतालङ्कारे पूर्वावस्थितरूपस्य नाश एव, तद्गुणालङ्कारे तु म्लानतामात्रं, न तु सर्वथा नाश इत्यनयोर्भेदः ॥

सङ्गतान्यगुणानङ्गीकारे स्यादतद्गुणम् ॥ ५३ ॥

सङ्गतस्य सहवर्तिनोऽन्यस्य गुणानङ्गीकारे गुणाऽग्रहणेऽतद्गुणमलङ्कारमाहुः । यथा—

दुर्जनेन सहितोऽपि सज्जनो नाददाति न च किञ्चिदुज्झति ।
काचसङ्कुलनकातरीकृतः किं मणिः स विकृताकृतिर्भवेत् ॥

अत्र सङ्गतस्यापि दुर्जनस्य काचस्य च कमपि गुणं सज्जनो मणिश्च नाददातीति वर्णनाद्भवत्यतद्गुणालङ्कारः ॥

अवज्ञा वर्ण्यते वस्तु गुणदोषाक्षमं यदि ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यदि वस्तु गुणे दोषेऽपि चाऽक्षममसमर्थमिति वर्ण्यते, इदं वस्तु न वा गुणाकरं न वा दोषाकरमित्याकारकहेलया तदवज्ञालङ्कारः । यथा—

एष नूनमवनीन्द्रकोटिभिर्लालितः सुरसमाजपालितः ।
नादृतोऽपि नृपसूनुनाऽमुना चेदहो! क्षतिरितीह का भवेत् ॥

अत्र तादृशस्य महापुरुषस्य केनचिन्नृपसूनुना कृतो नादरो न क्षतिकरो न वा गुणाकर इति तस्याऽवहेलावर्णनेन भवत्यवज्ञालङ्कारः ॥

प्राक्सिद्धस्वगुणोत्कर्षेऽनुगुणः परसन्निधेः ॥५४॥

परसन्निधानवशात् प्राक्सिद्धे एव स्वगुणेऽधिकोत्कर्षे वर्णिते सत्यनुगुणालङ्कारः । यथा शृङ्गारतटिन्याम्—

श्यामलाः सहजमेव कटाक्षाः कज्जलैरतितरां घनभासः ।
विश्वतोऽपि विरतानि मुनीनां विश्वतो मलिनयन्ति मनांसि ॥

अत्र सहजश्यामलानां कटाक्षानां कज्जलसन्निधानात्पुनरधिकोत्कर्षवर्णनेन भवत्यनुगुणालङ्कारः ॥

प्रश्नोत्तरक्रमेणोक्तावुत्तरालङ्कृतिर्भवेत् ।

प्रश्नोत्तरक्रमेणोक्तौ सत्यामुत्तरालङ्कृतिर्भवेत् । प्रश्नोत्तरक्रमस्तु—आदौ प्रश्नः पुनरव्यवधानेनैवोत्तरमिति । यथा—

मृतोऽपि को जीवति यो यशस्वी जीवन्मृतः को न हि यः परार्थी ।
को वा सुखी चेतसि यस्य शान्तिः को नाम दुःखी हृदि यस्य लोभः ॥

अत्र मृतोऽपि को जीवतीति प्रश्नस्याऽव्यवधानेनैव यो यशस्वीत्युत्तरं दत्तम् । एवमग्रेऽपीति भवत्युत्तरालङ्कृतिः ॥

पिहितं परवृत्तान्तज्ञानज्ञापकचेष्टितम् ॥ ५५ ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

परवृत्तान्तज्ञानस्य ज्ञापकं चेष्टितं यत्र वर्ण्यते तत्र पिहितालङ्कारः । अयं भावः—एतदीयवृत्तान्तोऽयं मया ज्ञात इति ज्ञापयितुं यत्र तूष्णीमेव चेष्टामात्रं क्रियते न तु किञ्चिदुच्यते तत्राऽयमलङ्कार इति । यथा शृङ्गारनटिन्याम्—

कुतूहलविलोकनस्फुरितचित्तमालोकितुं
स्थितास्म्यमरवाहिनीमिति मिषं वदन्त्याः सखी ।
नखक्षतनिरीक्षणात्कुचतटे त्रुटत्कञ्चुके
स्खलच्चपलचेलकाञ्चलमलङ्करोति द्रुतम् ॥

अत्र तव दिवाऽभिसाररूपो वृत्तान्तो मया ज्ञात इति सखीं ज्ञापयितुं तादृशं वस्त्राञ्चलं कुचतटेऽलङ्करोति शोभयतीति तस्या अयमाशयः । तथा हि—हे सखि ! आदौ वासोञ्चलेन कुचस्थितनखक्षतं पिधेहि पश्चान्मां प्रतारयेतीह भवति पिहिताऽलङ्कारः ॥

व्याजोक्तिः शङ्कमानस्य छद्मना वस्तुगोपनम् ।

यत्र शङ्कमानस्य कामपि शङ्कां कुर्वतो जनस्य निकटे छद्मना छलेन कृतवस्तुनो गोपनं क्रियते तत्र व्याजोक्त्यलङ्कारः । यथा तत्रैव—

किं पश्यसि त्वं परिवृत्तवक्त्रा मुहुर्मुहुः खिन्नशरीरयष्टिः ।
वत्तुङ्गगङ्गालहरीर्निरीक्ष्य भयेन पश्यामि पुनःपुनस्ताः ॥

अत्र कस्यचित्कामुकस्य दर्शनं शङ्कमानायाः सख्याः निकटे गङ्गातरङ्गदर्शनच्छलेन कृतमपि कामुकदर्शनं गोपयतीति भवति व्याजोक्त्यलङ्कारः ॥

वक्रोक्तिः श्लेषकाकुभ्यां वाच्यार्थान्तरकल्पने ॥५६॥

वाच्ये पदार्थे श्लेषेण काका वाऽर्थान्तरकल्पने कृते सति वक्रोक्त्यलङ्कारः । काकुः शिरश्चालनन्यायः । यथा—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मा गा विषादं मुग्धाक्षि! स्मरार्ता यामि कं सखि! ।
चरितं तव पश्यामि स्मरामि तु न कञ्चन ॥

अत्र विषादं खेदं मा गा इति सख्यामुक्तवत्यां सत्यां विरहिणी श्लेषेण विषादं विषभक्षकं महादेवं मा गा इत्यर्थं कल्पयित्वा हे सखि ! स्मरार्ता कामार्ताऽहं कं यामि; शरणमिति शेषः, स हि कामान्तक इति हेतोस्तमेव यामीत्याह । अथ साऽपि विदग्धा सखी आर्ताया यामिकं रक्षकं स्मर इत्यर्थं कल्पयित्वा पुनराह, अहं तु तव चरितमात्रं पश्यामि कमपि न स्मरामीति इत्येवमत्र भवति वक्रोक्त्यलङ्कारः ॥

स्वभावोक्तिः स्वभावस्य स्वजात्यादिषु वर्णने ।

स्वजात्यादिषु स्वभावस्य वर्णने कृते सति स्वभावोक्त्यलङ्कारः । यथा माधवचम्पूग्रन्थे—

आरूढक्षितिपालभालविगलत्स्वेदाम्बुसेकोद्धता
भेरीभाङ्कृतिचापटङ्कृतिचमत्कारोल्लसन्मानसाः ।
क्षुभ्यत्क्षोणितलं स्फुरत्खुरपुटं चञ्चच्चलत्केशरं
मन्दभ्रान्तविलोचनं प्रतिदिशं नृत्यन्ति वाजिव्रजाः ॥

अत्र जलसेकेन वाजिनामौद्धत्यं स्वभावः, एवं नर्तनकाले चलत्केशरादिरपि स्वभावः, स चाऽत्र वर्णित इति भवति स्वभावोक्त्यलङ्कारः ॥

भाविकं भूतभाव्यर्थसाक्षाद्दर्शनवर्णनम् ॥ ५७ ॥

यत्र भूतस्य भाविनो वाऽर्थस्य साक्षाद्दर्शनवर्णनं क्रियते तत्र भाविकालङ्कारः । यथा—

अद्यैवाऽयं प्रलयजलधिस्त्यक्तवेलोऽप्यवेल—
मद्याप्येष भ्रमति परितो भूपतिर्मानसिंहः ।



CC-0. Sampurnanand University Collection. Digitized by eGangotri

इत्थं कीर्त्तिक्षितिप ! भवतो जैत्रयात्रान्तराले
भूयोभूयः प्रसरति सतां व्यक्तवादः प्रवादः ॥

अत्र भूतस्य मानसिंहप्रयाणस्य भाविनश्च मलयजलधेर्वेलात्यागस्य दर्शनं साक्षादेव जातमिति वर्णनाद्भवति भाविकालङ्कारः ॥

देशात्मविप्रकृष्टस्य दर्शने भाविकच्छविः ।

देशादात्मनः सकाशाद्वा विप्रकृष्टस्य दूरवर्तिनो दर्शने वर्णिते सति भाविकच्छविरलङ्कारः । यथा शृङ्गारनटिन्याम्—

दूरस्थितस्त्वमसि दुर्जननिर्विशेषः
क्रूरात्मभाव इति मूढजनापवादः ।
त्वं दृक्पथे स्फुरसि नाथ ! सदा मदीये
क्रूराऽहमेव तव दृक्पथदूरसंस्था ॥

अत्र देशादात्मनः सकाशाद्वा विप्रकृष्टस्य नायकस्य दर्शनवर्णनेन भवति भाविकच्छविरलङ्कारः ॥

उदात्तमृद्धिश्चरितं श्लाघ्यं चान्योपलक्षणम् ॥९८॥

यत्राऽतिश्लाघ्यतरा ऋद्धिः सम्पत्तिर्वर्ण्यते, अथवाऽन्योपलक्षणमन्यवर्णनप्रसक्तं श्लाघ्यं चरितं वर्ण्यते तत्रोदात्तालङ्कारः । यथा—

आगाराङ्गणदेहलीमणिमहःश्रेणीसमुत्सारित—
ध्वान्तध्वान्तकुले द्विजातिमहिलालीलाविलासस्थले ।
गौडश्रीयशवन्तदानकणिकासम्पातसम्पादिते
नो जानन्त्युपयान्तमस्तमुदयं भास्वन्तमन्तःस्थिताः ॥

अत्राऽधिकतरसम्पत्तिवर्णनेनोदात्तालङ्कारः ।

अत्युक्तिरद्भुताऽतथ्यशौर्यौदार्यादिवर्णने ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अतथ्यभूतानामसत्यभूतानामद्भुतशौर्यौदार्यादिनां वर्णने कृते सत्यत्युक्त्यलङ्कारः । आदिना अन्ये चरित्रक्रियादयो ग्राह्याः । यथा—

असौ किमपि भूपतेस्तमस्य एकरेखायितो
हयो यदवगाहते क्षितिमितीह मन्ये ततः ।
विजित्य पवनान् परानुदितगर्वतः सर्वतो
निजश्वसनमारुतद्रुतजिगीषया धावति ॥

अत्राऽद्भुताऽतथ्यवेगवर्णनेन भवत्यत्युक्तिरलङ्कारः ॥

इत्यर्थाऽलङ्काराः ॥

अथ शब्दाऽलङ्कारा निरूप्यन्ते ।

खड्गबन्धादयश्चित्रा गतप्रत्यागतादयः ॥ ५९ ॥

खड्गबन्धपद्मबन्धादयो बन्धाः चरणेषु श्लोकेषु वा क्रमव्युत्क्रमाभ्यां पाठेन गतप्रत्यागताः । आदिना एकाक्षरद्व्यक्षराद्याः चित्रालङ्कारा भवन्तीत्यर्थः । यथा—

साऽनमा नवभा रामा माराभा वनमानसा ।
याति चारुविभामाभा भामाभाविरुचाऽतिया ॥

अत्र व्युत्क्रमपाठेन प्रथमाचरणाद्द्वितीयं चरणं तृतीयाच्चतुर्थमिति गतप्रत्यागतेनाऽत्र चित्रालङ्कारः । श्लोकार्थस्तु—न नमतीत्यनमा अभिमानिनी । नवभा नवदीप्तिः । मारेण कामेनाऽऽभातीति माराभा । वनाय जलमाहर्तुं मानसं चित्तं यस्या इति वनमानसा । तथा चारुविभया उत्तमदीप्त्या माचलक्ष्मीवद्भातीति चारुविभामाभा । भामा सत्यभामा तस्या भावोऽभिप्रायोऽस्यामस्तीति भामाभाविनी सा चाऽसौ रुक् चेति तया विशिष्टा । विशेषणं चाऽत्र तृतीया । अयं भावः—यस्यां रुचि सत्यभामाया

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अपि भावस्तिष्ठति ममाऽपीदृशी रुक् स्यात् तादृश्या तया विशिष्टा । ईदृशी या रामा सा अतिया अति अतिक्रम्य याति गच्छतीति तथा ॥

अनुप्रासश्चतुर्विधः—स्फुटानुप्रासो, लाटानुप्रासो, वृत्त्यनुप्रासः, छेकानुप्रासश्चेति । तत्राऽऽद्यः—

पदादिषु पदावृत्त्या स्फुटो वर्णविभेदतः ।
योगी भोगीव संयाति पश्य त्वमुभयच्युतम् ॥६०॥

पादस्याऽऽदौ मध्येऽन्ते वा वर्णस्य पदसम्बन्धिनो हलः स्वरस्य वा विभेदेन भिन्नत्वेन कृत्वा पदस्याऽऽवृत्त्या पुनःपुनर्निरूपणात्स्फुटानुप्रासालङ्कारः । उदाहरणम्—हे मित्र ! अयं योगी गृहाश्रमत्यागपूर्वं कृतयोगाभ्यासः पश्चाद्योगाच्च्युतो भोगीव भोगवान् गृहस्थ इव संयाति तमिममुभयलोकच्युतं त्वं पश्य । अत्र योगी भोगीति पूर्ववर्णविभेदेन पदावर्तनात्स्फुटानुप्रासः । यथा वा शिवस्तोत्रे—

जनः कामी कामी तव चरणगामी यदि तदा
पदं ब्रह्मादीनामपि हरति दीनाहितमिव ।
महेश ! त्वद्ध्यायी यदि पुनरमायी तु पुरुष—
स्तदा किं निर्मायं न हि पदममायं भजति सः ॥

अत्र प्रतिचरणमेव—कामी, गामी, दीना, दीना, ध्यायी, मायी, मायं, मायं, इति पूर्ववर्णविभेदेन पदावर्तनाद्भवति स्फुटानुप्रासालङ्कारः । क्वचित्पदे पूर्ववर्णविभेदः, क्वचिन्मध्यवर्णविभेदः क्वचिदन्त्यवर्णविभेदः । अन्यत्सममिति बोध्यम् ॥

अथ द्वितीयः—

लाटानुप्रासभूर्भिन्नाऽभिप्राया पुनरुक्तता ।
देवेशवेशवीक्षातो दुर्वासास्तोषमाप्तवान् ॥ ६१ ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यदा शब्देषु पुनरुक्तता भिन्नाभिन्नयाऽर्थभेदे नियन्त्रिता भवति तदा लाटानुप्रासो लाटानुप्रासालङ्कारः । उदाहरणम्—देवेश इन्द्रस्तस्य वेशः शोभाप्रकर्षं तस्य वीक्षाशो वीक्षणेन दुर्वाससो मुनेस्तोपमाप्तिर्जाता स्वकीयं हारं च ददाविति शेषः । अत्र देवेशपदे भिन्नाभिन्नायस्याऽर्थस्य पुनरुक्त्या लाटानुप्रासः । यथा वा माधवचम्पूग्रन्थे—

आलीभिर्नलिनीदलैः प्रतिदिशं दूरीकृतालिव्रजे—
मालाकारतया पुनःपुनरुपायातैः समासेविता ।
ईषद्भङ्गितकन्धरं प्रकटितप्रेमोत्करं प्रेयसी
किञ्चिच्चञ्चलचेलकाञ्चलचलन्नेत्राम्बुजं पश्यति ॥

अत्र चेलकाञ्चलचलदित्यत्र भिन्नाभिन्नायस्याऽर्थभेदे नियन्त्रितस्य चलचलशब्दस्य पुनरुक्त्या भवति लाटानुप्रासालङ्कारः ॥

अथ तृतीयः—

आवृत्तवर्णसम्पूर्णं वृत्त्यनुप्रासवद्वचः ।
जगज्जगन्निवासश्चेत्पाता नाऽर्कि वनेऽवने ॥ ६२ ॥

यत्राऽऽवृत्तेन पुनःकथितेन वर्णेनाऽक्षरमात्रेण सम्पूर्णं व्याप्तं वचो भवति तत्र वृत्त्यनुप्रासनामाऽलङ्कारः । उदाहरणम्—जगन्निवासो हरिः पाता रक्षकश्चेत्तर्हि वने यदवनं रक्षणं तन्निमित्तं कदाचिदपि जगत् विश्वं अर्कि दुःखि न स्यात् । जगन्निवास इत्यत्र विशेषणमात्रप्रयोगो विशेष्योपपत्तौ सागराम्बरादिवत् । 'अर्कं पापे च दुःखे च' इति विश्वः । अत्र जगज्जगदिति वने वने इति चकारवकारयोरेकहलोः पुनरावृत्त्या वृत्त्यनुप्रासः । यथा वा—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

निःस्वेदाकुलनीलकुन्तललसत्कर्णान्तपाली प्रियं
किञ्चिन्नामितकन्धराविगलितं वासः कराकर्षिणी ।
आयातं महिलाविलासनिपुणां मायाप्रियं कामिनी
किञ्चिल्लङ्घितचेलकाञ्चलचलन्नेत्राञ्चलं पश्यति ॥

अत्र लकारचकारयोरेकस्वरयोर्भिन्नस्वरयोर्भिन्नहलोरकारेकारयोरप्यनेकश आवृत्तिसत्त्वाद्भवति वृत्त्यनुप्रासनामाऽलङ्कारः ॥

अथ चतुर्थः—

सव्यञ्जनस्वरावृत्तौ छेकानुप्रास इष्यते ।
भव्ये गव्ये यादवानां रुचिर्मण्डे व्यजायत ॥६३॥

सव्यञ्जनानां स्वराणामावृत्तौ सत्यां छेकानुप्रासालङ्कारः । अयं भावः—यद्धलयुक्तो योऽभिहितस्तद्धलयुक्तस्य तस्याऽऽवृत्तिरिति । अत्र तु स्वरावृत्तिरावश्यकी व्यञ्जनावृत्तिरप्याद्यक्षरभिन्ना । लाटानुप्रासे तु सकलस्वरव्यञ्जनानामावृत्तिः शब्दे पुनरुक्ततयोक्तत्वादिति भेदः । उदाहरणम्—भव्ये सुन्दरे गव्ये गोसम्बन्धिनि मण्डे मस्तुनि तद्दर्शनादेव ब्राह्मणानां रुचिर्व्यजायत पार्थयज्ञे इति शेषः । अत्र भव्ये गव्ये इति सव्यञ्जनस्वरावृत्त्या छेकानुप्रासाख्योऽलङ्कारः । यथा हृदयकल्पलतायाम्—

चञ्चन्नीलाश्मलीलाविधिविहितमहाव्योमयात्रान्तराले
धत्ते मत्तेभकुम्भस्खलनपरिलसन्मौक्तिकानीव भानि ।
सव्येऽसव्येऽथ हस्ते कलयति कलया व्याजतः शीतभानोः
काश्मीरीरश्मिरीत्या स्फुरति मृगमदाद्धामिनी कामिनीव ॥

अत्र नीला, लीला, धत्ते, मत्ते, काश्मीरीत्यादिपदेषु सव्यञ्जनस्वरावृत्तिरवाद्भवति छेकानुप्रासालङ्कारः ॥

---

(१) अकारेकारयोः—इति मुद्रितपुस्तके पाठः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अथ यमकालङ्कारः—

सस्वरव्यञ्जनावृत्त्या स्तबकं यमकं भवेत् ।
देवं नारायणं वन्दे रमणीरमणीयकम् ॥ ६४ ॥

यदा सस्वराणां व्यञ्जनानामावृत्त्या कृत्वा स्तबकं वर्णसमूहो भवति तदा यमकालङ्कारः । अत्राऽयं भावः—यद्यत्स्वरयुक्तो यो यो हल्समुदायोऽभिहितस्तत्तत्स्वरयुक्तस्य भिन्नार्थस्य तत्तद्धल्समुदायस्याऽऽवृत्तिरिति । उदाहरणम्—रमणी रामा रमणीया यस्य तं लक्ष्मीकान्तमित्यर्थः । समासान्तः कः । तथाभूतं नारायणं देवं श्रीहरिं वन्दे स्तौमि । अत्र भिन्नार्थस्य रमणीपदस्याऽऽवृत्त्या यमकालङ्कारः । यथा वा हृदयङ्क-रूपललनायाम्—

पञ्चेषुपञ्चेषुभिराहताङ्गी सङ्गीतसङ्गीतपरम्पराङ्गी ।
पद्मेव पद्मा ललितस्वहस्ता वामाक्षि ! वामाक्षिपतीक्षणान्तम् ॥

अत्र भिन्नार्थानां पञ्चेषुपञ्चेष्वित्यादिपदानां मध्ये प्रतिचरणमेव सस्वरव्यञ्जनावृत्त्या वर्णसमूहत्वाद्भवति यमकालङ्कारः । अत्र बहुत्वसूचकं स्तबकमिति महिम्ना त्र्यक्षरप्रभृतिषु तादृगावृत्तिसत्त्वे यमकालङ्कारो त्र्यक्षरावृत्तिमत्त्वे च लाटानुप्रास इत्येवाऽयं भेदः ॥

अथ पुनरुक्तप्रतीकाशः —

पुनरुक्तप्रतीकाशः पुनरुक्तार्थसन्निभः ।
केसरी कानने भाति वनेभातिविमर्दकः ॥
भवान् सिंहासने भाति भातिसिंहासनेभवान् ॥६५॥

वस्तुतः पुनरुक्तार्थकभिन्नाऽऽपाततोऽवभासते यद्वाक्यं तत्पुनरुक्तप्रतीकाशो नामाऽलङ्कारः । यथाऽत्रैव केसरीति । अत्र—कानने भाति वने भाति इतिशब्दयोः पुनरुक्तार्थकत्वमा-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पाततोऽवभासते वास्तवं तु नास्ति । तथा हि—कीदृशः केसरी ? वनेभातिविमर्दकः, वनसम्बन्धिनामिभानां हस्तिनामत्यन्तं विमर्दको मर्दनकर्त्तेति । एवं सिंहासने भाति भातिसिंहासने इतिशब्दयोरपि पुनरुक्तार्थकत्वमापातत एवाऽवभासते न तु वास्तवमस्ति । तथा हि—किंभूतो भवान् ? भातिसिंहासनेभवान् भान्ति ते भाः, सिंहासनं सिंहकृतस्वकुम्भोपवेशनं तदतिक्रान्तं यैस्तेऽतिसिंहासनाः, भाश्च ते अतिसिंहासनाश्चेति कर्मधारयः । सिंहैरपि ये हन्तुमाक्रमितुं वा न शक्यन्ते एतादृशा इभा हस्तिनोऽस्य सन्तीति भातिसिंहासनेभवान् इति पुनरुक्तार्थसन्निभत्वादिह भवति पुनरुक्तप्रतीकाशालङ्कारः ॥

वीक्षणाय सदसद्विवेकिनां
शिक्षणाय लघुबुद्धिशालिनाम् ।
लक्षणैरिह विचिन्तनैर्मया
लक्षिता स्वकृतपद्यपद्धतिः ॥ ६६ ॥

द्वैताद्वैतमतादिनिर्णयविधिप्रोद्बुद्धबुद्धिश्रुतो
भट्टाचार्यशतावधान इति यो गौडोद्भवोऽभूत्कविः ।
ग्रन्थे काव्यविलाससंज्ञिनि चिरञ्जीवेन तज्जन्मना-
ऽलङ्कारैरियमादितो हृदि सतां सङ्गाय भङ्गिः कृता ॥ ६७ ॥

इति श्रीचिरञ्जीवभट्टाचार्यकृतकाव्यविलासे
अलङ्कारमयी द्वितीया भङ्गिः ॥
समाप्तश्चायं ग्रन्थः ।

77905

CC-0. Sampurnanand University Collection. Digitized by eGangotri

# THE PRINCESS OF WALES SARASVATI BHAVANA TEXTS.

Edited by

GOPINATH KAVIRAJ, M. A.

No. 1—The Kiraṇāvalī Bhāskara, a Commentary on Udayana's Kiraṇāvalī, Dravya section, by Padmanābha Miśra. Edited with Introduction and Index by Gopinātha Kavirāj, M. A.

No. 2—The Advaita Chintāmaṇi, by Rangoji Bhaṭṭa, Ed. with Introduction etc. by Nārāyaṇa Śāstri Khiste Sāhityāchārya.

No. 3—The Vedānta Kalpalatikā, by Madhusūdana Sarasvati. Ed. with Introduction etc. by Ramājña Pāṇḍeya Vyākaraṇāchārya.

No. 4—The Kusumāñjali Bodhanī, a Commentary on Udayana's Theistic Tract, Nyāya Kusumāñjali, by Varadarāja. Ed. with Introduction etc. by Gopināth Kavirāj, M. A.

No. 5—The Rasasāra, a Commentary on Udayana's Kiraṇāvalī, Guṇa Section, by Bhaṭṭa Vādīndra. Ed. with Introduction etc. by Gopināth Kavirāj, M. A.

No. 6 (Part I)—The Bhāvanā Viveka by Maṇḍana Miśra, with a Commentary by Bhaṭṭa Umbeka. Ed with Introduction etc. by M. M. Gaṅgānātha Jhā, M. A., D. Litt.

No 6 (Part II)—Ditto Ditto

No. 7 (Part I)—Yoginīhṛdaya dīpikā, by Amṛtānanda Nātha, being a Commentary on Yoginīhṛdaya, a part of Vāmakeśvara Tantra. Ed. with Introduction etc. by Gopināth Kavirāj, M.A.

No. 7—(Part II) Ditto Ditto

No. 8—The Kāvyaḍākinī, by Gaṅgānanda Kavīndra. Ed. with Introduction etc. by Jagannātha Śāstrī Hoshing Sāhityopādhyāya.

No. 9 (Part I)—The Bhakti Chandrikā, a Commentary on Śāṇḍilya's Bhaktisūtras, by Nārāyaṇa Tīrtha. Ed. with a Prefatory Note by Gopināth Kavirāj, M.A.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

No. 10(Part I)–The Siddhāntaratna, by Baladeva Vidyābhusaṇa.
Ed. with a Prefatory Note by Gopināth Kavirāj, M.A.

No. 11–The Śri Vidyā Ratna Sutras, by Gauḍapāda, with a Commentary by Śankarāraṇya.
Ed. with Introduction etc. by Nārāyaṇa Śāstri Khiste Sāhityāchārya.

No. 12–The Rasapradipa, by Prabhākara Bhaṭṭa.
Ed. with Introduction etc. by Nārāyaṇa Śastri Khiste Sāhityāchārya.

No. 13–The Siddhasiddānata Sangraha, by Balabhadra.
Ed. with Introduction by Gopināth Kavirāj, M. A.

No. 14–The Triveṇikā, by Āśādhara Bhaṭṭa.
Ed. with Introduction by Baṭukanātha Śarmā Sāhityopādhyāya, M. A. and Jagannātha Śāstri Hoshing Sāhityopādhyāya.

No. 15–(Part I)–The Tripurārahasya.
Ed. with a Prefatory Note by Gopināth Kavirāj, M.A.

No. 16–The Kāvya Vilāsa, by Chirañjīva Bhaṭṭāchārya.
Ed. with Introduction etc. by Baṭukanātha Śarmā Sāhityopādhyāya, M. A. and Jagannātha Śāstri Hoshing Sāhityopādhyāya.

No. 17–The Nyāya Kalikā, by Bhaṭṭa Jayanta.
Ed. with Introduction by M. M. Gangānāth Jhā, M. A., D. Litt.

No. 18 (Part I)–The Gorakṣa Siddhānta Sangraha.
Ed. with a Prefatory Note by Gopināth Kavirāj, M.A.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

## THE PRINCESS OF WALES SARASVATI BHAVANA STUDIES.

Edited by
GOPINATH KAVIRAJ ,M. A.

Vol. I—

(a) Studies in Hindu Law (I): its evolution, by Gaṅgānātha Jhā.

(d) The View point of Nyāya Vaiśesika Philosophy, by Gopinath Kaviraj.

(c) Nirmāṇa Kāya, by Gopināth Kavirāj.

Vol. II—

(a) Paraśurāma Miśra ALIAS Vāṇī Rasāla Rāya, by Gopināth Kavirāj.

(b) Index to S'abara's Bhāṣya, by the late Col. G. A. Jacob.

(c) Studies in Hindu Law (2):–its sources, by Gaṅgānātha Jhā.

(d) A New Bhakti Sūtra, by Gopīnāth Kavirāj.

(e) The System of Chakras according to Gorakṣa Nātha, by Gopināth Kavirjā.

(f) Theism in Ancient India, by Gopināth Kavirāj.

(g) Hindu Poetics, by Baṭuka natha S'armā.

(h) A seventeenth Century Astrolabe, by Padmākara Dvivedi.

(i) Some aspects of Vira S'aiva Philosophy, by Gopināth Kavirāj.

(j) Nyāya Kusumāñjali ( English Translation ), by Gopināth Kavirāj.

(k) The Definition of Poetry, by Nārāyaṇa S'āstrī Khiste.

(l) Sondala Upādhyāya, by Gopināth Kavirāj.

Vol. III—

(a) Index to S'abara's Bhāṣya by the late Col. G.A. Jacob.

(b) Studies in Hindu Law (3) : Judicial Procedure: by Gaṅgānātha Jhā.

(c) Theism Ancient India, by Gopintāh Kavirāj.

(d) History and Bibliography of Nyāya Viśeṣika Literature, by Gopināth Kavirāj.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

(e) Naiṣadha and S'rī Harṣa by Nīlakamala Bhaṭṭāchārya.
(f) Indian Dramaturgy, by P. N. Pāṭaṇakar.

Vol. IV—

(a) Studies in Hindu Law (4) : Judicial Procedure: by Gaṅgānātha Jhā.
(b) History and Bibliography of Nyāya Vaiśeṣika Literature. by Gopināth Kavirāj.
(c) Analysis of the Contents of the Ṛgveda Prātiśākhya, by Maṅgala Deva Sāstrī.
(d) Nārāyaṇa's Gaṇita kaumudī, by Padmākara Dvivedī.
(e) Food and Drink in the Rāmāyanic Age, by Manmatha nātha Roy.
(f) Satkāryavāda: Causality in Sāṅkhya, by Gopināth Kavirāj.
(g) Discipline by Consequences, by G. L. Sinha.
(h) History of the origin and expansion of the Aryans by A. C. Ganguly.
(i) Punishments in Ancient Indian Schools by G. L. Sinha.

To be had of—

The Superintendent, Government Press,
Allahabad, U.P. (India).

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri